॥ यदेव सत्यं भवतु तन्मे हृदि भासमानम् ॥

भू-भ्रमण-शोध-संस्कृत-ग्रन्थमालायाः पुष्पम् द्वितीयम्
[ सर्वसंख्यया २८ तमम् ]

# विज्ञानवाद–विमर्शः

- विज्ञानं विज्ञानवादश्च
- पृथिव्या आकार–मीमांसा
- पृथिव्या गति–मीमांसा
- भारता–मरीकयोः सूर्यप्रकाशान्तर–मीमांसा
- जैनशास्त्राधारेण विश्वदर्शनम्
- भारतीयज्यौतिषाधारेण पृथिव्याः आकार–गतिमीमांसा
- जैनग्रन्थेषु पृथिव्याः आकारगतिमीमांसा
- एपोलो–यानस्य चन्द्रयात्रामीमांसा
- अस्माकमुद्देश्यं कर्तव्यनिर्देशश्च

—: प्रकाशकम् :—
समस्तजैन–श्वे० श्री संघान्तर्गतम्
भू–भ्रमण–शोध–संस्थानम्
महेसाणा [उ. गुजरात]

P. P. Ac. Gunratansuriji M.S.
Jin Gun Aaradhak Trust

# अवश्यं पठनीयं ज्ञातव्यं मननीयञ्च

★ पृथिवी नास्ति गोलाकारा

★ पृथिवी नास्ति भ्रमणशीला

★ एपोलोयानं चन्द्रलोके न गतम्

★ भारतामरीकयोः सूर्यप्रकाशेऽन्तरं कथम्?

★ सूर्य-चन्द्रौ कथं भ्रमतः?

★ दिवा-रात्री च कथं भवतः?

★ चन्द्रस्य कलानां क्षय-वृद्धयोः किं कारणम्?

★ ऋतवः कथं भवन्ति?

★ स्वीडन-नार्वेप्रदेशे मासद्वयस्याहोरात्रे कथम्?-

-एवमादि-विसंवादपूर्णानामाधुनिक-विज्ञानवादोत्थापितानां
प्रश्नानां रहस्यावगमाय
भूगोल-खगोलसम्बन्धि-तटस्थान्वेषणकर्तॄणां
मुनि-अभयसागरगणिनां
संस्थानमाध्यमेन
जिज्ञासयाऽवश्यं सम्पर्कं
साधयत ! ! !

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

भूभ्रमणशोध-ग्रंथमाला-संस्कृतश्रेण्यां द्वितीयं पुष्पं

[ सर्वसंख्यया २८ तमम् ]

# विज्ञानवाद विमर्शः

[ विज्ञानवाद-सम्मतानां प्रचारबलात् सत्यापितानां
वार्त्ताभासानां मार्मिकी तर्कशुद्धविचारणा ]

सम्पादकः–

डॉ० रुद्रदेव त्रिपाठी
M. A. Ph. D.

प्रकाशकम्—

भूभ्रमणशोधसंस्थानम्

पो. बो. नं. ६

महेसाणा (उ. ग.) ...

सुरत–३९५००१

वीर नि. सं. २४९८
वि. सं. २०२८

निष्क्रय :
१ रूप्यक :

प्रथमावृत्तिः
१०००

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

# पृथ्व्या आकारस्य स्थिरतायाश्च सम्बन्धि सुन्दरं साहित्यम्

## प्राचीनम् :-

श्रीजम्बूद्वीप-प्रज्ञप्तिः
श्रीसूर्य-प्रज्ञप्तिः
श्रीचन्द्रप्रज्ञप्तिः
श्रीज्योतिष्करण्डकम्
श्रीबृहत्क्षेत्रसमासः
श्रीलघुक्षेत्रसमासः
श्रीबृहत्संग्रहणी
श्रीक्षेत्रलोकप्रकाशः
श्रीमण्डलप्रकरणम्
श्रीजम्बूद्वीपसमासः
श्रीद्वीपसागरप्रज्ञप्तिः
श्रीकाललोकप्रकाशः
श्रीजम्बूद्वीप-संग्रहणी
श्रीतत्त्वार्थसूत्रम्
श्रीतत्त्वार्थसूत्रश्लोकवार्तिकम्
—इत्यादयो ग्रन्थाः ।

## अर्वाचीनम् :-

१. वन हण्ड्रेड प्रूफ्स देट दि अर्थ इज नोट ए ग्लोब (लेखक-अमरीकाया विद्वान् विल्यिम कारपेंटर महाशयः)
२. मॉडर्न साइंस एण्ड जैन फिलॉसॉफी
३. पी. ऐल. जॉग्राफी १, २, ३, ४ भागाः
४. जैनदर्शन और आधुनिक विज्ञान
५. भूगोल-भ्रमण-मीमांसा
६. विश्व-रचना-प्रबन्ध
७. जैन भूगोल (महत्त्वपूर्ण प्रामाणिक ग्रन्थ)
८. जैन खगोल ( ,, ,, )
९. जैन भूगोलस्य विशालकाया प्रस्तावना
१०. पृथ्वी-स्थिर-प्रकाश
११. दि एस्ट्रोलॉजिकल मैगेझीन जुलाई-अगस्त १९४६
१२. ,, ,, ,, फर्वरी १९६१
१३. सण्डे न्यूज आफ इण्डिया २-५-१९४८
१४. अहिंसावाणी, विशाल भारत-आदि मासिकानाम् अङ्काः
१५. कोटक थियेरी ले. डी.जे.कोटक
१६. सूर्य-गतिविज्ञान-महामहोपा० लक्ष्मीनारायण द्विवेदी पो. तिर्वा जि० फर्रुखाबाद (यु पी.)

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

# प्रकाशकीयम्

विश्वजीवजीवातुवर्य–संस्कृतिमर्मज्ञ–महानुभावानाम् करकुशेशययोरिदं लघुपुस्तकं सहर्षमुपढौकियते सुरुचिरतत्त्वज्ञानपरिपूतसद्दृष्टि–निर्मितिबलेनाऽऽधुनिकानां कतिपयानां विवादगोचराणाम आभासिक–पदार्थानां यथस्वरूपनिर्णितये ।

वर्तमाने ह्यनेहसि बुद्धिबलस्यैकांगविकसनस्य प्रचुरतया शिक्षातन्त्रस्य भौतिकवादपरतया च नववयस्कानां शास्त्रीयतत्त्वानामनववबोध–प्रगुणिता विकलतमबुद्धिमत्त्वेपि स्वीययैव तर्कणाशक्त्याऽतीन्द्रियाणामपि पदार्थानाम् स्वरूपावगमस्य धाष्टर्यपूर्णसाहसवति पथि सुतरामहम्मन्यतया प्रवृत्तिः दरीदृश्यते ।

एतादृश्यां हि परिस्थित्यां सम्यक्स्वरूपानवबोधमूलः सत्तर्क–निकषपरीक्षितः तत्त्वज्ञानस्य प्रशस्यतमो हि पन्थाः यदि न निदर्श्येत, तर्हि तु विना गोपालकं गवां विप्रणाशवत् समुचितविवेकपरिहीनानां शब्दपंडितानां अपि तथाकथितवैदुष्ये सम्प्राप्तेऽपि शतमुखो विनिपातः सुस्पष्टतम एव ।

अतएवाऽस्मादृशानां विज्ञप्तिगर्भप्रार्थनया पूज्योपाध्यायतपस्वि–शिरोऽवतंस–**श्रीधर्मसागर**–गणिवर्य–शिष्यैः सार्द्धयुगमितवर्षैः तलस्पर्शि–रीत्या विज्ञानवादं समभ्यस्य तत्त्वज्ञानरीत्या तार्किकशैल्या च नवयुगीनशिक्षितजनान् सुरुचिसमुत्पादनपूर्वं विशिष्टतरं प्रयतनवद्भिः श्रीमद्भिः **अभयसागरगणिभिः** तत्त्वज्ञानस्य सूक्ष्मधीगम्योऽपि पन्थाः सुविशदरुचिकरशैल्या विज्ञानाभिमतपदार्थानाम-

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

स्थिरत्वं कल्पनाधारितत्वं विभिन्नधारणाकान्तत्वमित्यादि संप्रदर्श्य सरलतमो विहितः, एतदर्थं च पूज्यश्रीणां संशोधन–प्रचुरसाहित्यस्य विदुषाम् जनतायाश्च सविधे सम्प्रेषणाय विक्रमसंवत् २०२३ श्रावण-शुक्लायां ५ तिथौ–सोमवार दिने "भू–भ्रमण–शोध–संस्थानस्य" गतिविधिः कार्यसरणिश्च प्रारब्धा, यद्द्वारा भू–भ्रमण–शोध–ग्रन्थमाला इत्यस्य विभागस्यान्तर्गतं सप्तविंशतिसंख्याकानां पुस्तिकानां प्रकाशनम् अभूत् । अथाऽन्यानि कियन्ति च पुस्तकानि मुद्रणालये प्रकाशनायोद्यतानि वर्तन्ते, कियन्तो निबन्धा लेखाश्चालिख्यन्त, तथा केचन मुद्र्यमानाः सन्ति ।

अमरिका-भारत देशयोर्मध्ये १०½ घण्टामितं समयान्तरं कस्माद्-वर्तते ? विषयस्याऽस्य रहस्य-ज्ञानायोपर्युक्तस्य साहित्यस्याऽवलोकनार्थं तथा च तटस्थरीत्या विचार–विमर्शं कर्तुम् सज्जना आमन्त्र्यन्ते ।

विशेषतो विषयस्याऽस्य मार्मिकया रीत्या तलस्पर्शि-अभ्यासं कर्तुम् निम्नाङ्किते संकेते संस्थानेन साकम् सम्पर्क–साधनाय निवेदनमस्ति ।

**समस्त जैन श्वे. संघान्तर्गतम्**

**भू–भ्रमण–शोध–संस्थानम्**

**पोष्ट बॉक्स–संख्या ६**

**पो. महेसाणा** (उ. गु.)

इति

निवेदकौ

दोशीत्युपपद–चीमनलालात्मज–रतिलाल–

पटवीत्युपपद–फूलचंदात्मज–कीर्तिकुमारौ

भू–भ्रमण–शोध–संस्थान–

कार्यवाहकौ

P. P. Ac. Gunratansuriji M.S.		Jin Gun Aaradhak Trust

# सम्पादकीयम्

अथायं परमप्रसत्तेरवसरप्रसरो यद् विज्ञान-विज्ञप्ति-विघूर्णितानां विदेशि-विचर्चिका-वितर्दितानां भारतभारती-भारतीयभारतीयता-संरक्षणभावनया कृत-क्षणानां भारतीयेन विज्ञानेन विज्ञानवादस्य घण्टाघोषं परीक्षितुकामानां विदुषां करयोरयं 'विज्ञानवादविमर्श' उपदीक्रियते ।

अत्र चर्चिता विषयाः पुरातनैराचार्यचणैश्चिरं चीर्णा अपि चर्चिता अपि भगवतो वाल्मीकेः "आम्नायानामयोगेन विद्यां प्रशिथिलामिवे" त्युक्त्यनुसारं सत्यमेव प्रशिथिलतां संश्रिता विज्ञानविषयाः साम्प्रतम् । विज्ञानस्य विषया इमे वेदेषु, आगमेषु धर्मशास्त्रेषु चाऽतीव सूक्ष्मया सरण्या विमृष्टाः सन्ति । तेषां ज्ञानाऽभावात् तथा नवीनस्य भौतिकविज्ञानस्य बाह्याऽम्बर-डिण्डिमघोषात् सकलमपि जगत् स्वशास्त्राणि प्रति श्रद्धाहीनमिव प्रतिभाति ।

वेदेषु विज्ञानशब्दो बहुत्र समागतस्तत्र बहुषु स्थलेषु स्पष्टमेव विज्ञानशब्दः साम्प्रतिक' साइंस' शब्दस्यार्थं एव प्रयुक्तः । शतपथब्राह्मणे 'एतद् विज्ञानम्' इति पाठो यास्कस्य निरुक्ते कल्पसूत्रे च 'इति विज्ञायते' इति लिखित्वा तत्तद्वैज्ञानिकविषयाणां समुपस्थापनमिदं भौतिकविज्ञानमेव निर्दिशति । ईश्वरकृष्णश्च सांख्यकारिकाया द्वितीयस्यामार्यायां विज्ञानशब्दं प्रयुञ्जानोऽपीममेवार्थं प्राचीकटत् । छान्दोग्योपनिषदि भगवन्तं सनत्कुमारं प्रति देवर्षेर्नारदस्य कथनं यन् मया 'राशिविद्या-दैवविद्या-भूतविद्या-नक्षत्रविद्या-सर्प-देवजनविद्या

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

प्रभृतीनामध्ययनं कृतमित्यादौ देवविद्याया अर्थे निश्चितमेव आदित्य--चन्द्र-बृहस्पति-ग्रहाणामिन्द्राग्निपुरस्सराणामेव विद्येति। अयमेव विज्ञानशब्दोऽमरकोषकारस्य 'विज्ञानं शिल्पशास्त्रयो' रिति सूचनेन द्विधाऽऽम्नातोऽर्थं प्रत्यौति।

सम्प्रति शिल्पार्थकस्य विज्ञानशब्दस्य लौकिकसाधनाधिक्येन 'पृथिव्या आकारः, पृथिव्या गतिः, चन्द्रस्य परप्रकाशिता, सूर्यस्य स्थिरताप्रभृतयो' विषया, शास्त्रदृष्ट्या सर्वथा विपरीता एव समुद्घोषिताः सन्ति। एतैः सहैव अमरीकावासिभिरेकादश-प्रभृतिभिरन्तरिक्षयानैर्मानवाश्चन्द्रं स्पृष्टवन्तो दृष्टवन्तस्तत्राऽवतीर्य च मृत्तिका-पाषाणखण्डाद्यानयनेन च विमृष्टवन्तोऽपि। इत्थं दृढं प्रचारयन्तो विज्ञानवादिन आत्मनो देवविजयितां ख्यापयन्तो व्यराजन्त। भारतीया आस्तिकाः समाचारमिमं श्रावं श्रावं मनस्येव मनसि खिन्न-खिन्ना-स्तुन्ना तुन्ना अजायन्त, नास्तिकाश्च तद्विषये काँश्चिदूहापोहान् विनैव भारती यानि शास्त्राणि शास्त्रकारांश्च तर्जयन्तः खेदयन्तश्च प्रसन्ना अदृश्यन्त

अत्र किं सत्यं? किं वाऽसत्यमिति गवेषणं शास्त्रज्ञानां दलादापति कर्माभूत्। चन्द्रस्य विषये समग्रेऽपि धार्मिकसाहित्ये वर्णितस्य विशिष्य च ज्योतिषशास्त्रगणिताधारेण संसूचितस्य विचारस्य विमर्शा तेषु तेषु चाऽऽगमादिषु वर्णितान् विचारान् प्रस्तुत्य विमृश्य दोलाचलवृत्तिमाश्रितानां धार्मिकानां जनानां मनांसि सत्येन परिषेक तेषां श्रद्धां स्थिरयितुं प्रयतमानेषु भारतीयेषु विद्वत्सु मौलिभूताः श्रीमन्त मुनिवरा अभयसागरगणिवर्या निरतं तत्पराः सन्ति। एतैर्मुनिवरैः प्राय विंशतिवर्षेभ्यो विज्ञाननाम्ना प्रसृति गतस्य विज्ञानवादस्य मिथ्याटो

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

विघटयितुं प्रयत्यते, तदाधारेण च भूयांसि पुस्तकानि प्रकाश्य, व्याख्यानानि प्रदाय, जनताः सम्बोध्य वैज्ञानिकैरेव शोधनैर्विज्ञानवादस्य त्रुटीः परीक्ष्य बहुधा घोषितं यद् विज्ञानवादिनां प्रचारैः सत्यंन पराभविष्यति, न च शास्त्राणि महर्षीणां वचनानि त्रिकालाऽबाधितानि कथमपि मिथ्या भविष्यन्ति। अत्र केवलं सर्वैरपि सुधीभिः स्वाध्यायेन शास्त्रपर्यालोचनेन विदुषां सङ्गत्या च सत्यशोधने तत्परैर्भाव्यमिति।

किञ्च—

न वृत्ताकाराऽऽस्ते क्वचिदपि धरा नो गतिमती,
न वा सूर्यः स्थायी न च खलु शशी प्रस्तरमयः।
गुरुत्वाकृष्टिर्वा न भवति न वा चन्द्रगमनं,
भृशं शास्त्रोच्छित्त्यै विहितमिव मन्येऽत्र सकलम् ॥

ज्योतिश्चक्रे स्थानमास्ते विश्वोः किं,
कोऽसौ चन्द्रः पार्थिवो वा द्युलोकी।
चन्द्रे गातुं मानवः किं सशक्त—
स्तद्यात्रार्थं शास्त्रदृष्टिश्च काऽस्ति ? ॥२॥

कृता चन्द्रयात्रा सुधा तत्र नास्ते,
नवाप्यौषधीशस्य गेहेऽस्ति वृक्षः।
न तत्सुन्दरं वस्तु यद् वक्त्रशोभा—
समानत्वमाख्यातुमुच्येत भूयः ॥३॥

ग्रहमण्डलमध्यगतोऽस्ति शशी,
स—कलः सकलोऽमृतवर्षिवरः।
निगमागमसम्प्रथितः खचरो,
भुवि सम्प्रति चर्चपदं गमितः ॥४॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

विज्ञानवादस्य विजृम्भणेयं,
ध्रुवं विमृश्या कृतिभिः श्रुतज्ञैः ।
तथा नितान्तं सदसत् परीक्ष्य,
सत्यं सुपथां भुवि दर्शनीयम् ॥५॥

एवंविधान् विचारान् सर्वत्र सम्प्रसार्य भारतीय–संस्कृतिसंरक्षणाय जागर्तिकामनया च संस्कृतभाषायां 'विज्ञानवाद–विमर्श' नामाऽयं ग्रन्थः सङ्कलितः ।

अत्र प्रमुखरूपेण मुनिवर्य श्रीमदभयसागरगणिवर्याणां विचारा एव विभिन्नेषु विभज्य नवीनया पद्धत्या संलिख्य च प्रकाशिताः सन्ति । अन्याऽन्यासु देशस्य भाषासु 'भू–भ्रमण–शोध–संस्थान' माध्यमेन प्रकाशितानां पुस्तिकानामिव संस्कृतेऽप्येतस्य साहित्यस्य सुप्रचारः स्याद्, विद्वांसश्च विशाले भारतीयसाहित्ये निगूढं विज्ञान–रहस्यं निरीक्ष्य परीक्ष्य च स्वीयान् स्वीयान् विचारान् पुरस्कुर्युः, केवलं च 'विज्ञानवाद एव सर्वमस्ति' सेयं मिथ्या धारणा विनश्येदस्ति कामनैषाऽस्माकम् ।

इतः पूर्वं 'भूगोल–भ्रम–भञ्जनी' नाम्नी संस्कृते लघु–पुस्तिका प्रकाशिताऽस्ति, द्वितीया चेयम् । इमां च विदुषां करयोः समर्प्य विचारणाय त्रुटीः परिमार्जनाय च सम्प्रार्थ्य विरमामि ।

१७–१२–७१ } दिल्ही

सम्पादक :
डॉ. रुद्रदेव त्रिपाठी

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

# विज्ञानं विज्ञानवादश्च



लेखक :
डॉ. रुद्रदेवः त्रिपाठी,
M. A., Ph. D.



P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

## 卐 निबन्धान्तर्गतविषयाः 卐


| | पृ० |
|---|---|
| * विज्ञानस्य परिभाषा | ११ |
| * भौतिकं विज्ञानं दार्शनिकी दृष्टिश्च | १२ |
| * विज्ञान-परम्परा | १३ |
| * विज्ञानवादः | १५ |
| * विज्ञानवादो विज्ञानं तत्त्वज्ञानश्च | १६ |
| * कण्टकं कण्टकेन सत्यमसत्येन | १८ |


P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

विज्ञानस्य परिभाषा

शास्त्रकृद्भिर्महर्षिभिरतिप्राचीनकालाद् ज्ञानेन सह विज्ञानस्यापि विचारणा प्रारब्धा । यस्या अनुमानं तात्कालिकसाहित्यस्य परिशीलनेन भवति । तदानीन्तनी सेयं विज्ञान–मीमांसा पक्षद्वये विभक्ताऽऽसीत्, यस्याः प्रथमं स्वरूपं शास्त्रीयस्य चिन्तनस्य कोटावजीघटद् द्वितीयश्च शिल्प-क्रिया-स्वरूपेण विकासमलभत । अमरकोषस्य रचयित्रा श्रीमदमरसिंहेनास्मिन् विषये—'विज्ञानं शिल्पशास्त्रयोः' इति कथयित्वा रहस्यस्यानावरणं विहितम् ।

सामान्यतो 'विशिष्टं ज्ञानं विज्ञानमिति व्युत्पत्तिरप्यस्त्येव, परं शास्त्रचिन्तनस्य निगूढायां परम्परायां यथार्थतोऽवगाहनं कुर्वद्भिर्भारतीयैर्विशिष्टज्ञानरूपस्यास्य विज्ञानस्य शास्त्ररूपोऽर्थ एव स्वीकृतः । भारतस्यायमुद्घोष आसीद् यद् 'योऽनूचानः स नो महान्' इति । एतदनुसारं स्वस्य नैसर्गिकोऽनुरागस्तैरनवरतं प्रयस्य शास्त्रनिर्माण एव प्रकटितः । ज्ञान–विज्ञानयोः याः का अपि धारास्तेषां प्रौढचिन्तनेनाभिषिक्ता सती सर्वत्र प्रसन्न–गम्भीरं प्रसरणमवाप्य लोकमवबोधयति ।

तत्रापि प्रमुखरूपेण भारतीयदर्शने विज्ञानस्याध्यात्मिकता सर्वैरादृताऽऽसीत् । यथा हि–'विज्ञानं यज्ञं तनुते । कर्माणिऽपि च । विज्ञानं देवाः सर्वे ब्रह्म ज्येष्ठमुपासते । विज्ञानं

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

ब्रह्म चेद् वेद ॥" इत्यादि । अनया दृष्ट्या विज्ञानस्य शिल्परूपोऽर्थः संक्षिप्यैवात्र भारते समादृतोऽभूदिति ।

भौतिकं विज्ञानं दार्शनिकी दृष्टिश्च

अस्माकं दार्शनिक्या दृष्टयाः पुरतो भौतिकस्य विज्ञानस्य साम्प्रतिक्य उपलब्धयो हतप्रभा एव भवन्ति । यतो हि वास्तविकतायाः समक्षं क्षणिका सुखोपलब्धिः कियदवधि स्थातुं शक्नोति ? ऋतम्भरायाः प्रज्ञाया आलोके सम्वर्धितस्य ज्ञान-विटपस्य शाखा प्रशाखा विविधपत्र-पुष्प-फलैः परिपूर्णा यत्र वास्तविकताया अवास्तविकतायाश्च तात्त्विकं निर्देशं ददाना विराजन्ते, तत्र भौतिकस्य प्रेतस्य क्षणिक आवेशः शलभानां पङ्क्तेरिव तुच्छं प्रकाशं वितीर्य कियन्तमप्यन्धकारे प्रक्षेपणस्य प्रयासं कुर्यात्, परं किं तेन भारतीया विचलिताः भविष्यन्ति ?

आस्थाया अनास्थायाः प्रश्ने सति तत्र कथञ्चिद् मानयितुं शक्यते यद् बुद्धेः प्रवर्धमान आवेगोऽवश्यमेव साधारणं जनजीवनमास्थातोऽपकृष्यानास्थां यावदपनयति, परं यथा प्रदीप्तोऽप्यग्निर्भस्मनाऽऽवृतः सन् शैत्यं नाविष्करोति तथैव सत्यमपि वैचारिकैरौपचारिकैश्चावरणैरसत्यं न भवितुमर्हति । एकस्मिन् दिने सत्यस्य द्वारं प्रत्यागमनेनैव शान्तिर्मिलिष्यति । अत एव भौतिकं विज्ञानं दार्शनिकदृष्टेः पुरतः प्रभाहीनमस्ति ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

विज्ञान–परम्परा

एकतो विज्ञानस्य शिल्प–प्रक्रियोपासका भारतीयानां तद्विषयेऽनवबोधं प्रकटय्य कथयन्ति यदस्माकं विज्ञानसाधनं वीक्ष्येर्ष्यावशादेवं जल्पन्ति ते । वस्तुतो यदि विज्ञानस्यास्या धारायाः समुचितो विकासो नाभविष्यत्तदा सकलमपि विश्वं पशुवदेवास्थास्यत् । दैनिकीनां सुविधानां समाधानादेव जनानामन्यान्येषु कर्मसु समादरः सम्भवति अतो ज्ञानमपि विज्ञानमाश्रित्य विकसितमिति । परमेतन्न विचारसहम् ।

प्रथमे विद्वांसोऽपि विज्ञानस्याध्यात्मिकीं धारामादृत्यापि न सुतरां शिल्परूपे विज्ञाने मन्दतामभजन् । शास्त्रेषु सन्ति भूयसां विज्ञानविजृम्भितानामस्त्र–शस्त्र–विमानादि–वस्तूनां वैज्ञानिक–क्रियाकलापानाञ्च नितान्तं चरमोत्कर्षसूचको विमर्शः । यथाहि–अस्त्रशस्त्रविषयमधिकृत्य श्रीमन्मधुसूदनझा–महोदयेन 'इन्दुविजय' ग्रन्थे वर्णितम्—

ब्रह्मशिरो ब्रह्मास्त्रं, पाशुपतं वैष्णवं च वरुणास्त्रम् ।
नारायणास्त्रमैन्द्रं, प्राजापत्यास्त्रमाग्नेयम् ॥१॥

वायव्यं कौबेरं, पार्जन्य–त्वाष्ट्र–काल–याम्यानि ।
दानवमथ च स्कान्दं, प्रमथं वैनायकं च कूष्माण्डम् ॥२॥

गण–गान्धर्वे राक्षस–पैशाचे भौत–वैताले ।
शारभ–तार्क्ष्ये शाबर–फैरव–मातङ्गनाम–मकरास्त्रम् ॥३॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

सौपर्णं भारुण्डं, चौलूकं गालणं चेति ।
पाषाण-कालकूटे, चाक्रेषीके बलातिबले ॥४॥
औदुम्बरं च राजस–हैमन–गुह्यानि शौरमुन्मादः ।
स्तम्भन-कम्पन-जृम्भण-जम्भक-मूर्च्छानिमीलनोत्पाताः ॥५
प्रस्वापनं च मोहनमचेतनं भ्रामकं ज्वरास्त्रं च ।
वैद्युत–दैवत-तामस–भेदादासन् चतुःषष्टिः ॥६॥

एवं तत्रैव विमानानामुल्लेखोऽप्यस्ति दर्शनीयः–

दिव्यविमानं निर्मितमृभुभिर्वेदे त्रिचक्रमाख्यातम् ।
दिवि भुवि तद् ह्युभयत्र प्रचाल्यते स्मादभुतं यानम् ॥१॥
पुष्पकविमानमासीद् यत्तु प्रसिद्धमस्त्येव ।
कामगमं तद् यात्रायोग्यं पुष्पादिभूषितं चासीत् ॥२॥
युद्धविमानं सौमं नगराकारं हि शाल्वस्य ।
श्रीकृष्णेन तु युद्धे विनाशितं तस्य दुष्टस्य ॥३॥
सूतविमानं पारदशक्त्या सञ्चालितं चासीत् ।
आस्थानयन्त्रभागाद् विभक्तं तन्मनोजवं यानम् ॥४॥
अथ हर्यश्वविमानं हयद्वयात्मकमृभून्नीतम् ।
इन्द्रनिमित्तं कृतमिति वेदे व्यावाणतं चित्रम् ॥५॥
अपि चेन्द्रायैव कृतं प्लवाख्यमेकं समुद्रसन्तरणम् ।
पक्षिसमान-विमानं तच्चाकाशेऽपि डयते स्म ॥६॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

किंच प्राचीनेष्वप्रकाशितेषु विनशन–विनाशनावशिष्टेषु बहुषु ग्रन्थेषु भृगुसूत्र–वाल्मीकिसूत्रादिषु नैकेषां तिर्यगूर्ध्वाधोगतिमतां यानानां विविधवैज्ञानिकप्रकाराणां चिकित्सागणितादिविषयाणां शोधापेक्षं साहित्यमद्याप्युपलभ्यते । रोम्णो विदारणसमर्थानां शल्यानामत्र स्थितिरासीदिति सकलमपि प्राचां शिल्परूप–विज्ञानस्य सर्वज्ञतां तत्तत् समयोगि–प्रयोगनैपुण्यञ्चाविष्करोति । सेयं विज्ञान–परम्पराऽत्र भारते विजृम्भमाणैवाऽतिष्ठदिति ।

विज्ञानवादः

अन्योऽप्यस्तोकः प्रश्नः, यं हि जनाः प्रायेणोपस्थापयन्ति । तेषामस्ति कथनं यदद्य विज्ञानं विना जीवनस्य प्रवाहः पूर्णरूपेण गतिहीनो भवति । इदृशी का क्रियाऽस्ति ? यया विज्ञानं परित्यज्य जीवनमतिवाहयेम ? परमस्त्यस्य सरलमुत्तरम् । तच्च—'वयं विज्ञानं यथाकथंचित् उपादेयं मन्महे यथावश्यकं च तद् हितावहमपि स्वीकुर्मः, परं विज्ञानस्य नाम्ना विज्ञानवादस्य याः शाखाः प्रशाखाः प्रसरन्ति, तस्य मूलानि दृढीभवन्ति, तदस्माकं न हितकृदिति ।'

यथाहि–'विज्ञानस्य सीम्नि संस्थाय कस्या अपि गवेषणाया यदाऽऽरम्भो भवति, तदा तस्याः स्वरूपमन्यदेव तिष्ठति, यथा क्रमशो निरीक्षण–परीक्षणाभ्यां विचारणेन

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

परा एव धारणा भवन्ति तदैव च काश्चन पूर्वा धारणा विनश्यन्त्यपि । तस्य च क्रमस्योत्तरावस्थायाः चरमावस्थायां समागमनेन सह गवेषणा घोषणाया रूपं गृह्णाति, परं हि गवेषणा तु तदानीमप्यवशिष्टा भवति । एतामेवातुरतां वयं "विज्ञानवाद"नाम्ना विमृशामः । अविचारितरमणीयस्य पक्षपातिन एतस्मिन्नेव धरातले समेत्य संयमं भ्रंशयन्ति व्यतीतं च वर्तमानस्य तुलायां तोलयन्तस्तत् तुच्छमिति कथनस्य दुःसाहसमाचरन्ति ।

अद्य प्रायोऽस्यैव विज्ञानवादस्य सर्वत्र डिण्डिमघोषः श्रूयते । अज्ञानविजृम्भिता अपि यतस्ततः कर्णाकर्णिकयाऽऽकर्णितं सत्यमिव प्रत्यक्षदृष्टमिव स्वानुभवविलसितमिव प्रतिपादयन्ति । लोकजिह्वाश्रयमवाप्य च तदिदं सर्वं गोपालाद् भूपालं यावदात्मनः प्रभावेण बाह्याडम्बरबाहुल्येन चाकचक्यचातुरीचर्चितेन प्रभावयति । अतोऽस्य सत्यतथ्यज्ञानाय मिथ्यामोहतिरस्करणाय च नितरामावश्यकतास्ति । विशिष्य चास्तिकक्षेत्रे विज्ञानाविष्कारपरिष्कारविचारशून्यता तिष्ठति। आस्तिकाः किल स्वाध्याय–तपःप्रभृतिषु क्रियासु संयतमानसाः सन्तो व्यर्थासु वार्तासु समयं न यापयन्ति । तेषां सात्त्विकं जीवनमपि तादृशसमययापनात्ताननुरुणद्धि । अतः श्रुते विश्वसन्ति कल्पितजल्पिते च न श्रद्दधति ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

विज्ञानवादो विज्ञानं तत्त्वज्ञानश्च

मनोविज्ञानं मस्तिष्कस्य स्तरत्रयी मनुते। येषां इड इगो–सुपरइगोनाम्ना व्यवहारः प्रसिद्धः। एतेषु प्रथम इड-नामको विभागः कामपि वार्तां तत्कालं प्रयोजयितुं बलान्नियोजयति; तच्च इगोनामको विभागः कञ्चित्कालं यावदवरोद्धुमिच्छति, सुपरइगोनामकश्च विना चिन्तनं न करणीयमिति धिया प्रतिबध्नाति। एवम् 'अधुनैव-अधुनैव, नाधुना नाधुना, कदापि नैव कदापि नैवेति' प्रक्रिया विज्ञानवादस्य तत्त्वज्ञानस्य च विषये घटन्ते। विज्ञानवाद इडवद् 'अधुनैवेति' आग्रहणाति, विज्ञानं परीक्षणं शिष्यत इति दृष्टया नाधुना नाधुनेति संसूच्य शोधाय प्रेरयति, तत्त्वज्ञानश्चासीमतायां सामान्यस्य सीमारेखानिर्धारणस्य किमपि महत्त्वमगणयत् 'कदापि नैवेति' समादिशति।

उपर्युक्तया दृष्ट्या विज्ञानवादस्य सर्वत्र व्यापकः प्रभावः परिलक्ष्यते। पृथिव्या आकारः, पृथिव्या गतिमत्त्वम्, सूर्यादिग्रहाणामाकृति–स्थिति–गति–परिस्थिति–विचाराः, गुरुत्वाकर्षणम्, चन्द्रस्य परप्रकाशिता, चेत्यादिविषयाः वैज्ञानिक क्षेत्रे प्राथमिक्यां भूमिकायां वर्तमाना अपि जनान् स्वेषां प्रचारप्रसाराडम्बरादिबलेन विमोहयन्ति–विडम्बयन्ति, कर्तव्यपथाद् विरमयितुं चेष्टन्ते, शास्त्राणि प्रति श्रद्धाभावं शिथिलयन्ति,

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

महत आचार्यान् प्रति चेतांसि कलुषयन्ति, पूर्वजान् प्रति–तेऽज्ञा आसन्निति भावनया औदासीन्यमुत्पादयन्ति ।

कण्टकं कण्टकेन सत्यञ्च सत्येन

इदमस्ति सुप्रथितं नीतिवाक्यं यत् कण्टकं कण्टकेनैव शोधयेत् सत्यञ्च सत्येन परीक्षेत' इति । एतदनुसारं समस्तस्यापि जगतो मानवस्येदं कर्तव्यमस्ति यद् विज्ञाननाम्ना प्रसारितस्य विज्ञानवादस्य याथार्थ्यं विज्ञातुं विज्ञानविधिनैव वैज्ञानिक–प्रयोगपरीक्षणेनैव तेषां प्रणालीनां परिचयं सम्प्राप्य तत्र तत्र वर्तमानानां प्रवर्तमानानां विधानानां सम्यगनुशीलनेन परीक्षणेन च तस्मिन् कियत् सत्यं कियद्वा मिथ्येति निष्कर्षो निष्कासनीयः। तथा च वास्तविकस्य सत्यस्य ख्यापनं कृत्वाऽसत्यस्यारोपितासत्यस्य च विना भयमभयेन भावेन विरोधः कर्तव्य इति ।

इममेव विधानमाश्रित्य प्रायो विंशतिवर्षेभ्यो लोक-कल्याणं कामयमानाः, प्रत्यहं मिथ्याऽऽटोपेन जनतावञ्चनजनितखेदेन दूयमानाः, स्वसंस्कृतिरक्षणबद्धकक्षाः, स्वशास्त्रपक्षसत्यापनदक्षाः, श्रीमन्तो गणिवर्याः श्रीअभयसागर–महाराजाः स्वस्य साधना–श्रम–स्वाध्यायानुशीलन–लेखन–प्रवचनादिमाध्यमैर्वैज्ञानिकमिमं विषयं सम्यगधीत्य परीक्ष्य च तदाटोपान्धकारं ज्ञानभानोः प्रकाशात् तिरयितुं दृढं प्रवृत्ताःसन्ति ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

एतद्विषये–'भू भ्रमण–शोध–संस्थान' द्वारा ऽद्यावधि सप्तविंशतिसंख्याकानि पुस्तकानि हिन्दी-गुजराती-संस्कृतां-ग्लभाषादिषु प्रकाशितानि सन्ति। तेषां वाचनेन मननेन पत्रव्यवहारेण साक्षात्कारेण च याथार्थ्यज्ञानायामन्त्रयामो जिज्ञासुवर्गम्। सत्याय सत्यज्ञानाय प्रयतनीयमेवेति बुद्धिशालिनां बुद्धेः फलमित्यलं पल्लवितजल्पितेन।

सम्यक्........पठन्तु........ !!!

विचाराः + तर्काः =

विज्ञानवादः

विचाराः + जिज्ञासा =

तत्त्वज्ञानम्

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

॥ तत्त्वज्ञानं
पदार्थस्वरूपनिर्णये
प्रत्यलं ॥

स....म्य....क्....प....ठ....नी....यं....

व्युद्ग्राहितमतिः स्वच्छन्दता अहम्मन्यता
कुतर्कवादितेत्यादयः
तत्त्वज्ञानभूमिकाऽवरोधकपदार्थाः
सज्ज्ञानिनिश्रया सम्यक्
समवबुध्य परिहार्याः

॥ विज्ञानवादशैल्या
पदार्थस्वरूपं
याथार्थ्येन
प्रतीतिपथि नाऽवतरति ॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

# पृथिव्या आकार-मीमांसा

मुनि अभयसागरो गणी
M. N. G. S. वॉशिंगटन
(अमेरिका)

P. P. Ac. Gunratansuriji M.S.
Jin Gun Aaradhak Trust

## 卐 निबन्धान्तर्गतविषयाः 卐


पृ०

* अपिपृथ्वी २३

सत्यमेव हि गोलाकारा ?

यदि पृथ्वी

गोलाकारा स्यात् तदा— २४

विज्ञान-प्रयोग सम्मत—

तर्कशुद्धानुपपत्ति—

चतुर्दकशम्


म....न....नी....यं

जिज्ञासा हि सत्य दर्शनस्य

प्राथमिको भूमिका,

किन्तु

श्रद्धा–तटस्थता सहकृता सती सत्याधि गति

प्रयोजिका भवति-

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

## अपि पृथ्वी सत्यमेव हि गोलाकारा ?

अद्यत्वे विज्ञानवादस्य मलिन-मन्दे प्रकाशेऽनेकेषां लोकानां मनसि "पृथ्वीयं गोलाकारा विद्यते" इत्यसौ विषयः सिद्ध-प्रमाणरूपमेकं तथ्यमिव जातमास्ते ।

मूलभूतेषु तर्केषु युक्ति-प्रमाणादिषु सुदृढेष्वसत्स्वपि च प्रचारे तथा वाह्यघटाटोपे आधारितत्वाद् विचारशीलाः सचेतसो बुद्धिशालिनो लोकाश्चापि "पृथ्वी गोलाऽऽकाराऽऽस्ते" इत्येवं स्वीकरणं नाम नवयुगस्य प्रचलनं मन्यमानाः सन्ति ।

अद्य तु विषयेऽस्मिन्—तर्कबद्धया रीत्या विचारणं विवेचनं चापि हास्यास्पदं परिगण्यते, तथा च-"नास्त्यसौ पृथ्वी गोलाकारा" इत्येवं प्रतिपादयतो जनस्य मस्तिष्कं विकृतमिव मन्यते ।

अस्याः सर्वस्याः परिस्थितेः कारणं वस्तुतो रेलगन्त्र्यो, राकेटयानं, जेटविमानं, आकाशवाणीयन्त्रं, टेलीविज्ञनयन्त्रं चित्रग्रहणयन्त्रं, तथा च क्ष-किरणप्रभृतीनां प्रत्यक्षं परिदृश्यमानानां साफल्यानामाधारे विज्ञानवादो लोक-हृदये स्व-प्रभाव-मुद्रामङ्कितवानास्ते ।

तस्मादेव लोकास्तदेतन्मन्यन्ते यद्धि वास्तवेऽर्थे प्रयोगा

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

दीन् विधायैव "पृथ्वी गोलाकारा वर्तते" इत्येवंविधो विनिश्चयो निर्धारितः स्यादिति ।

परन्त्वत्रैव वास्तविकत्वं तु अन्यदेव प्रमाणितं भवति। पृथिव्या गोलाकारत्व-सम्बन्धे न कोऽपि च सुव्यवस्थिताँस्तर्क-शुद्धाँस्तथा च प्रत्यक्ष-प्रयोगान् विदधे, काश्चन धारणाः पुरतो निधाय, तदनुरूपा सम्भावनाः सम्मुखं संस्थाप्य मुग्धभावाः प्रजाः "पृथ्वी गोलाकारा वर्तते" इत्येवमवबोधयितुं प्रयत्नोऽक्रियत । अत्र प्रचारेण, वाह्यसाधनानां प्राचुर्येण तथा प्रयोग-परीक्षणादीनां वाह्याडम्बरादिभिर्बुद्धिमन्तो जनाश्चापि सम्मिलिता अक्रियन्त ।

वस्तुतः पृथ्व्या गोलत्वस्य सम्बन्धे नैकाऽपि काचन सत्या युक्तिर्विद्यते । अतो विपरीतं यदि पृथिवी गोलाकारा सम्भाव्येत, तदा बह्व्यो विप्रतिपत्तय आपत्तयश्च भवन्ति। ताश्चाधोलिखितानुसारम्—

(१) यदि पृथ्वी गोलाकारा स्यात् तदा—

यदा दूरादागच्छन्तं जलपोतं वयं केवलनेत्राभ्यां पश्यामस्तदा केवलं तस्योपरिभागे वर्तमाना चञ्चूरेव दृश्यते, केवलमित्थं प्रतीयते, परन्तु स एव हि जलपोतो दूरवीक्षणयन्त्रेण दृष्टः सन् सर्वाङ्गसम्पूर्णो दृश्यते । एवं कस्माद्भवति ?

पाठशालानां पाठ्य-पुस्तकेषु पाठ्यमानेषु प्रयोगेषु कियद् दूरान्तरे पृथिव्या गोलत्वस्य भागस्य मध्ये व्यवधानरूपेणाग-

P. P. Ac. Gunratansuriji M.S.　　Jin Gun Aaradhak Trust

मनात् सम्पूर्णो जलपोतो नहि दृश्यते, नह्येतत् स्पष्टीक्रियते, केवलं तस्योर्ध्वमुत्थितो भाग एव दृश्यते, परं इत्येतावदेव समुल्लिखनं दूरदर्शनयन्त्रेण मिथ्या सिद्धयति !!!

(२) यदि पृथ्वी गोलाकारा स्यात्, तदा–

'हेटेरासंस्थानस्य (अमरीकास्थस्य) दीपस्तम्भः ४० मा० दूरतः कस्माद् दृश्यते? यतः ४० मा० प्रमाणान्तरे पृथिव्या वक्रता ९०० फुटप्रमाणं भवेत्तथा हेटेरासंस्थः दीपस्तम्भः ३०० फुटमितश्चोच्च आस्ते, तथापि स सर्वः सम्पूर्णः कस्मात् परिदृश्यते ?

(३) यदि पृथ्वी गोलाकारा स्यात्, तदा–

एकस्मिन्नेव समावेऽन्तरे समुद्रेऽथैकैकमीलप्रमाणे दूरे संस्थापितेषु त्रिषु वंशेषु प्रथमो वंशो ननूर्ध्वाकारस्तथा तत्पश्चाद्वर्तमानौ वंशौ निम्नौ किमर्थं दृश्येते ?

(४) यदि पृथ्वी गोलाकारा स्यात्, तदा–

विषुवद्वृत्तस्योत्तरस्यां दिशि विद्यमाना नद्यो ह्युत्तरतो दक्षिणं प्रति प्रवाहवत्यो भवितुमर्हन्ति । तथा च विषुवद्वृत्ताद् दक्षिण भागे वर्तमाना नद्य उत्तरतो दक्षिणं भागं प्रति प्रवाहवत्यो भवितुमर्हन्ति ।

परन्तु हिमालयादधो बह्व्यो नद्य उत्तरतो दक्षिणं प्रत्यपि च वहन्ति । एवं कस्माद्भवति ?

२

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

(५) यदि पृथ्वी गोलाकारा स्यात्, तदा–

अमरीकाया "एस्ट्रोनोमिकल ब्यूरो" इति नाम्न्या संस्थया प्रकाशिते प्रतिवेदन–विवरणे ननूल्लिखितमास्ते, यद्धि– "ईसवीय सन १९०५मे वर्षे जातं सूर्य–ग्रहणं पश्चिमोत्तराफ्रीकायां उत्तरेशियाभागे तथा ब्रिटीश–अमरीकायाश्चादृश्यतेति"। एवं सति अमरीकायामेशियाभूभागे च तदिदं सूर्य–ग्रहणं युगपत् समकालं कथमिवादृश्यत उभयोः विपरीतदिक्स्थत्वेऽपि ?

(६) यदि पृथ्वी गोलाकारा स्यात्, तदा–

सुएझनहेर–संज्ञबृहत्जलप्रणाल्यां कुल्यायां १०० मा० प्रमाणायां पृथिव्या गोलत्वप्रमाणानुपातेन प्रतिमाईलं ३ फुट प्रमाणोच्चत्ववती भवेत् सा किमर्थं नास्ति ?

विशेषोऽयं यद्धि सन् १८७७ वर्षीयस्य ब्रिटिशसंसदो विधाने फ्रांसदेशस्य शिल्पविज्ञानविद : (इंजीनीयर इति ख्याताः) "पृथ्वी गोलाकारा नास्ते" इत्थं मत्वैव सुएझनहेर निर्माणस्योल्लेखं कस्मात् कृतवन्तः सन्ति ?

(७) यदि पृथ्वी गोलाकारा स्यात्, तदा–

जलं सदा समानं समतलं समानस्तरीयमेव सन्तिष्ठते, तदा पुनर्जलं सर्वतोदिक् कथमिवावस्थितं वर्तते ?

(८) यदि पृथ्वी गोलाकारा स्यात्, तदा–

विषुवद्वृत्तरेखा उपर्युपरि उत्तरध्रुवस्योपरिभूय उत्तरअमरी-

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

कायां गत्वा, दक्षिण–अमरीकातः दक्षिणध्रुवमभिस्पृश्य पुनर्विषुववृत्तरेखायां गन्तुं पारयेन्नाम ?

(९) यदि पृथ्वी गोलाकारा स्यात्, तदा–

अद्यपर्यन्तं जाताः सर्वाश्चापि प्रदक्षिणाः यात्रास्तथा प्रवासादयः पूर्व–पश्चिमगा एव किमर्थं भवन्ति ?

(१०) यदि पृथ्वी गोलाकारा स्यात्, तदा–

'केपटन जे. रास'नामा साहसयात्री ईसवीय सन् १८३८ वर्षे 'केपटन फ्रेशियर' इत्याख्येन सह दक्षिण–महासागरे दक्षिण-ध्रुवं प्रति यावद्दूरं गन्तुमपारयत्, तावज्जगाम। तत्र सः ४५० फुटप्रमाणतः १०००फुट पर्यन्तां सरलोर्ध्वां सघनां सुदृढां च हिमभित्तिं समुपलब्धवान्, यस्यां गर्तं वा च्छिद्रं वा विदारण–रेखां वेत्यादिकं किमपि न दृष्टवान्।

तस्यां भित्तौ तावनुसन्धित्सया महतोत्साहेनाग्रतश्चेलतुः। चत्वारि वर्षाणि तौ निरन्तरं सेरतुः। ४०,००० मील प्रमाणा सा यात्रा बभूव, परन्तु तस्या भित्तेरन्तं तौ न प्रापतुः। किमर्थमित्थं बभूव ?

दक्षिणे यस्मिन् स्थाने सैषा हिमरूपाभित्तिरलभ्यत, तत्र पृथिव्याः परिधिः केवलं १०,७०० मीलप्रमाणैव वर्तते। ३० अक्षांशमितमेव तयोर्गमनात्। एवं तौ विनैव वलनं स्थाना–

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

देकस्मान्निर्जग्मतुः, परन्तु पुनस्तत्रैव पुनरागमनस्य सिद्धान्तानुसारं ताभ्यां चैतदेव स्थानं चतुर्वारं प्राप्तव्यमुचितमासीत्।

इत्थं न भूत्वा ताभ्यां पुनः स्वदेशं पुनः सम्प्रातुं परिवर्तितव्यमापतितम्, तथा चैवं कृते तयोः सार्द्धद्विवर्षमितः समयो व्यतीतवान्। एवं कस्माद् बभूव?

(११) यदि पृथ्वी गोलाकारा स्यात्, तदा–

'दि इन्टरनेशनल सर्वे कम्पनी' त्याख्यायाः संस्थायाः प्रतिवेदनाधारेण "विषुववृत्ततः२३½अंश मितोत्तरभागे एको रेखांश ४० मीलप्रमाणस्ततोऽग्रे सः क्रमेण ३५,३०,२६ वोभूयमान ० विन्दावुत्तरध्रुवोपरि द्वे अपि च रेखे मिलतः, यदा च विषुववृत्तात् २३॥ अंशमिते दक्षिणे तु नन्वेको रेखांशः ७५ मील प्रमाणप्रायो विस्तृतः प्रतीतः। ततः पुनः स रेखांशोऽग्रेऽग्रे समधिकं विस्तृतो भवन्नीचैर्दक्षिणं प्रति ३० अक्षांशे तु १०३ मील पर्यन्तं विस्तृतो गणयित्वा निश्चितः।" किमर्थमेवम्?

(१२) यदि पृथ्वी गोलाकारा स्यात्, तदा–

विषुववृत्त–रेखातो नीचैर्गच्छतो जनस्य ध्रुवतारकः दृष्टिपथं नैवावतरेत्, परन्तु तस्यां दिशि साहसयात्रां कुर्वाणाः "कैपटन मीले' प्रभृतयो दक्षिणे ३० अक्षांशपर्यन्तम् ध्रुवतारकः

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

कथमित्र ददृशुः ?

(१३) यदि पृथ्वी गोलाकारा स्यात्, तदा–

उत्तर–ध्रुव–क्षेत्रे तथा दक्षिण–ध्रुवक्षेत्रे च उभयतोऽपि मासत्रयं रात्रिस्तथा मासत्रयं दिनं च समानमेव भवितुमर्हतः । परन्तु वॉशिंगटननगरस्य (अमरीकायाः) ब्यूरो आफ–नेविगेशन' इत्यनया संस्थया प्रकाशिते–'नॉटिकल–एलमेनक' इति पञ्चाङ्गे निर्दर्शितानुसारं दक्षिणस्य ७० अक्षांशोपरि शेटलैंड-द्वीपे सर्वतो दीर्घं दिनं १६ घण्टा–५३ मिनट प्रमाणं निर्दर्शितं तथा चोत्तरे ७० अक्षांशेषु नोर्वेदेशे सर्वतो दीर्घतमं दिनं मासत्रयमितं भवति । कथमेवम् ?

(१४) यदि पृथ्वी गोलाकारा स्यात्, तदा–

हारपर्स वीकली' (अमरीकायाः साप्ताहिकं पत्रं) इति पत्रे २०–१०–१८३४ ई. संस्करणे निर्देशानुसारम् "उत्तरे कोलोरेडोइलेक्शन पेमाउट डन कम्प्रेगीतः" (१८३ मील प्रमाणे दूरे) माउण्ट एलेन–पर्यन्तं हेलियोग्राफीसाहाय्येन समाचाराः केन वा प्रकारेण प्रेषयितुं समशक्यन्त ?

यतः १८३ मीलेषु पृथिव्या वक्रत्वं हि षड्फुटाधिक २२३ मीलमितमवरोधरूपेणापतेत । एवं विधान्यनेकानि तर्कबद्धानि प्रमाणानि वर्तन्ते ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

कुतूहलं + आपातिकप्रयोगाः =
= आविष्काराः
जिज्ञासा + यथाविधि समभ्यासः =
= उपलब्धयः

तत्त्वज्ञानस्य मुद्रालेखः

* सत्यं ह्यतीन्द्रियं, बुद्धि-मनसोर्गती इन्द्रियगम्यपदार्थेष्वेव, अतः सत्यन्तु अनुभव-गम्यमेव ।
बुद्धि-मनसीतु सहकारिणी ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

# पृथिव्या
# गति-मीमांसा



लेखक:

मुनि अभयसागरो गणी
M. A. S. (बंबई)

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

## 卐 निबंधगतविषयाः 卐

पृ०

* अपि सत्यमेव हि ३३
पृथ्वी भ्रमति ?

* विज्ञानदृष्ट्या
पृथ्व्या गतिस्त्रिविधा ३३

* "यदि च पृथ्वी ३६
सत्यमेव हि
भ्रमन्ती भवेत्तदा—"
(प्रबलानुपपत्तिदिग्दर्शनम्)

* "यदि च पृथ्वी ३७
सत्यमेव हि
भ्रमन्ती भवेत्तदा—"
अनुपपत्तिसप्तदशक—
व्यावर्णनम् ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

अपि सत्यमेव हि पृथ्वी भ्रमति ?

अद्यत्वे जगति स्वप्रभावं सुस्थिरतया संस्थापयितुं चेष्टमानस्य विज्ञानवादस्य कानिचित् सर्वथाऽसंगतानि भ्रान्तिपूर्णानि चापि तथ्यानि बाह्याडम्बरस्य प्रचारस्य च बलात् प्रजानाम् मानसे बद्धमूलानि भवितुमारभन्त, तेष्वेकमिदमास्ते, यद्धि "पृथ्वी सूर्यं परित इतस्ततो भ्रमति ।" इति ।

परन्तु विज्ञानं तु प्रयोग–सिद्धं मन्यते, तथाऽपि "पृथ्वी भ्रमति" इत्यत्र विषये केन कदा कतरेण च प्रयोगेन विनिश्चितम् ? नाऽसौ विषयोऽस्ति प्रमाण–सिद्धः । केवलं कल्पनाः गतिशीलाः कृत्वा विषयोऽयं लोकानां मानसे भ्रमोत्पादन–विधया संस्थाप्यते ।

विज्ञान दृष्ट्या पृथिव्या गतिस्त्रिविधा—

(१) धूःसंज्ञ–स्वीयाक्षोपरि गतिः'यया-ऽहोरात्रौ भवतः, सैषा गतिः प्रतिघण्टात्मके समये १०००मा०प्रमाणा वर्तते ।

(२) सूर्यमभितःवर्तिनी गतिः, यया ऋतवो भवन्ति, सैषा गतिः प्रतिघण्टात्मके ६६००० मा०प्रमाणाऽऽस्ते ।

(३) सूर्येण सहवर्तिनी गतिः, सेयं गतिः प्रतिघण्टात्मके समये ७,२०,००० मा०प्रमाणा विद्यते, यतः सूर्योऽपि

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

# 卐 निबंधगतविषयाः 卐


पृ०

* अपि सत्यमेव हि पृथ्वी भ्रमति ? ३३

* विज्ञानदृष्टया पृथ्व्या गतिस्त्रिविधा ३३

* "यदि च पृथ्वी सत्यमेव हि भ्रमन्ती भवेत्तदा—" (प्रबलानुपपत्तिदिग्दर्शनम्) ३६

* "यदि च पृथ्वी सत्यमेव हि भ्रमन्ती भवेत्तदा—" अनुपपत्तिसप्तदशक—व्यावर्णनम् । ३७

अपि सत्यमेव हि पृथ्वी भ्रमति ?

अद्यत्वे जगति स्वप्रभावं सुस्थिरतया संस्थापयितुं चेष्टमानस्य विज्ञानवादस्य कानिचित् सर्वथाऽसंगतानि भ्रान्तिपूर्णानि चापि तथ्यानि बाह्याडम्बरस्य प्रचारस्य च बलात् प्रजानाम् मानसे बद्धमूलानि भवितुमारभन्त, तेष्वेकमिदमास्ते, यद्धि "पृथ्वी सूर्यं परित इतस्ततो भ्रमति ।" इति ।

परन्तु विज्ञानं तु प्रयोग–सिद्धं मन्यते, तथाऽपि "पृथ्वी भ्रमति" इत्यत्र विषये केन कदा कतरेण च प्रयोगेन विनिश्चितम् ? नाऽसौ विषयोऽस्ति प्रमाण–सिद्धः । केवलं कल्पनाः गतिशीलाः कृत्वा विषयोऽयं लोकानां मानसे भ्रमोत्पादन–विधया संस्थाप्यते ।

विज्ञान दृष्ट्या पृथिव्या गतिस्त्रिविधा—

(१) धूःसंज्ञ–स्वीयाक्षोपरि गतिः'यया-ऽहोरात्रौ भवतः, सैषा गतिः प्रतिघण्टात्मके समये १०००मा०प्रमाणा वर्तते ।

(२) सूर्यमभितःवर्तिनी गतिः, यया ऋतवो भवन्ति, सैषा गतिः प्रतिघण्टात्मके ६६००० मा०प्रमाणाऽऽस्ते ।

(३) सूर्येण सहवर्तिनी गतिः, सेयं गतिः प्रतिघण्टात्मके समये ७,२०,००० मा०प्रमाणा विद्यते, यतः सूर्योऽपि

P. P. Ac. Gunratansuriji M.S.    Jin Gun Aaradhak Trust

शौरिनामकस्य ग्रहस्य दिशि (प्रतिपलं=प्रतिसेकण्ड इति) २०० माइलमितेन वेगेन स्वकीयं सम्पूर्णग्रहमण्डलं स्वेन साकमादाय परिभ्रमन्नास्ते ।

आसां त्रिविधानां गतीनां सम्यक् समन्वयं संसाध्य पृथिवी गतिशीला भवति ।

(१) अत्र महत्त्वपूर्णः प्रश्नोऽसौ भवति यद्धि प्रतिघण्टात्मके समये ७२००००, ६६०००, १००० मीलमितेन जवेन भ्रमन्त्यां पृथिव्यां स्थिताः सर्वे पदार्थाः व्यवस्थिताः कथमिव संस्थातुं सम्भवेयुः ?

(२) पुनरेतावत्या तीव्रतया सैषा पृथ्वी पश्चिमत पूर्वां दिशं गच्छन्ती यदि भवेत्तदा सदा सर्वदा पृथ्व्या वायोः सम्मुखीनाया दिशो घर्षणं कियत् प्रभूतमनुभवगम्यं भवितुमर्हति ?

(३) यदि च पृथ्वी नन्वेतावता तीव्रेण वेगेन भ्रमन्ती स्यात्तदाऽऽकाशे उड्डीनः पक्षी पुनः कथमिव स्वनीडं प्राप्तुं शक्नुयात् ?

(४) तथा च पृथिवीतले स्थितो मृगयाकरो जनः कथमिव स्वलक्ष्यं साधयितुं प्रभवेन्नाम ?

अथाऽस्य समाधानाय प्रयोज्यमाना युक्तिः "वातावरणमपि पृथिव्या साकं भ्रमति" इत्यपि निकृष्टाऽऽस्ते ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

(अ) यतो विश्वस्मिन् जगति किमपि वाहनम्, शकटं, मरुत्त्वरं किंवा वायुयानं स्वेन सह वातावरणमप्यादाय धावद् भवेत्तदिदं नास्ति सम्भवत् ।

(आ) अथ पुनः २०-१२-१९६७ दिनाङ्कस्य 'टाइम्स आफ इण्डिया' इति पत्रे प्रकाशितेन 'इण्डिया साइंस एकादमी देहली' इत्यनया संस्थयाऽऽयोजितायां, बेंगलोरनगरे सम्पन्नायां परिपदि, नोबल-पुरस्कार-विजेतेति प्रख्यातेन वैज्ञानिकेन श्रीसरचन्द्रशेखर-वेंकट-रमण-महाभागेन "पृथिव्या साकं वातावरणं न भ्रमति" इत्येवं वैज्ञानिक-शोधस्याऽऽधारेण प्रदत्तेन महत्त्वपूर्णेन प्रवचनेन तु स्पष्टतः प्रमाणितं भवति, यद्धि-"पृथ्व्या गतिस्तथा च वातावरणस्य गतिर्भिन्ने स्तः।"

अस्यां स्थितौ तु पृथिव्या उड्डीनः पक्षी कथमिव स्वकुलायं (नीडं) प्रति निवर्तितुं शक्नुयात ? यतः पृथ्वी तु प्रतिघण्टासमये १००० मील प्रमाणं धावति ।

(५) यदि च पृथ्वीयं गतिशीला भवेत्तर्हि वायुयानमभ्युष्य निराधारे आकाशे स्थिरीभूय पृथ्व्या गोलो भ्रमेच्चेत्तदा यत्र वयमिच्छेम तत्रोत्तर्तुं शक्नुयाम, तदा पुनर्वायुयानस्य गतिशीलकरणस्य का वाऽऽवश्यकता वर्तते ?

(६) सैषा पृथ्वी सूर्यस्य गुरुत्वाकर्षणेन बद्धाऽऽस्ते। सूर्यश्च शौरिग्रहं प्रति गुरुत्वाकर्षणेनाऽऽकृष्टो भूत्वा समस्तं ग्रहमण्डलं

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

समादाय प्रधावन्नास्ते । एवं सति पृथ्वीयं दिसम्बरमासतः जूनमासपर्यन्तं तु सूर्येण सममाकृष्यमाणा सूर्यस्य समीपमभितो शक्नुयान्नाम, परन्तु जुनतो दिसम्बरपर्यन्तं पृथ्वी तु पूर्वतः पश्चिमां दिशं यायात्तथा सूर्यस्तु २० कोटिवर्षेषु चक्रमेकं पूर्णं कुर्वाणः १० कोटिवर्षेभ्योऽनन्तरं पूर्वस्याः पश्चिमां दिशमागच्छेत्तावत्पर्यन्तं तु पश्चिमतः पूर्वां दिशं गच्छेत्तदा जुनतो दिसम्बर पर्यन्तं पूर्वतः पश्चिमं ६६००० मील-मितेन गतिवेगेन गच्छन्तीं पृथ्वीं सूर्यः स्वगुरुत्वाकर्षणेन स्वेन साकं (अर्थात् १० कोटिवर्षाणि यावत् पश्चिमतः पूर्वां दिशं गच्छन्) ७२०००० मीलप्रमाणया तीव्रगत्याऽऽकर्षेत् इत्थमाकर्षण–विकर्षणयोवराक्याः पृथ्व्या गतिरेव कथं भवेत् ? तदिदमतीव गाम्भीर्येण विचारणीयमास्ते ।

<u>यदि च पृथ्वी सत्यमेव हि भ्रमन्ती भवेत्तदा–</u>

ध्रुवतारको हि वर्षपर्यन्तमेकस्मिन्नेव स्थाने नन्वेकसमानया रीत्या कथमिव द्रष्टुं शक्येत ?

यतः २९ जूनदिनेऽथवा २९ दिसम्बरदिने तु पृथ्वी २१ मार्चदिनस्य स्थानापेक्षया १६ कोटिमाइलप्रमाणे दूरे भवेत्तदा ध्रुवतारकस्य कोणस्तिर्यग् भवितुमर्हति ।

अद्यत्वे तु २०० इञ्चव्यासमितदृग्काचयुतानि विशालकायानि दूरवीक्षणयन्त्राण्याविष्कृतानि वर्तन्ते, यैःसूक्ष्मात्सूक्ष्म-

तरस्यापि वस्तुनोऽन्तरं ज्ञातुं शक्यते। एवं सति १६ कोटिमाइल प्रमाणे दूरेस्थितायाः पृथिव्या ध्रुवतारकस्य जायमानं निरीक्षणं, ध्रुवतारकस्य सरलरेखायामवस्थितायाः पृथ्व्या निरीक्षणेन समानप्रायं स्यादिति सम्भवेत् किम् ?

तदिदमुत्तमोत्तमं प्रत्यक्षमुदाहरणमास्ते, यद्धि सेयं पृथ्वी नैव भ्रमतीति !

यदि च पुनरेषा पृथिवी भ्रमन्ती स्यात्तदा–

अद्यत्वे ननु वैज्ञानिकस्य जगतः पुरतो निम्नाङ्कितानि तथ्यानि प्रश्नचिह्नरूपाणि विद्यन्ते, येषां तर्क–शुद्धानि समाधानोत्तराण्यद्यततनानां समर्थानामपि वैज्ञानिकानां सविधे न वर्तन्ते तथाहि—

(१) पृथ्वी भ्रमतीत्यस्य सिद्धान्तस्य सत्यं प्रमाणं किम् ?

(२) यदि च पृथ्वीयं भ्रमति चेत्तदा पृथिव्यां वर्तमानानि समस्तानि पदार्थजातानि विकीर्ण–प्रकीर्णानि भूत्वा किमर्थं नो विकीर्यन्ते ?

(३) समुद्रस्य जलं लघु–महान्ति गृहाणि, विराटकायाः पर्वतास्तथा च विविधाकारप्रकारा जीवसृष्टिरितीमानि सर्वाणि यदा पृथ्वी ननूच्चावचं परिवर्तते–विपरिवर्तते च तदा स्वाधारादुत्क्षिप्तानि भूत्वा किमर्थं नो निपतन्ति ?

(४) पृथिव्या भ्रमण–कक्षाऽण्डाकारा लम्बगोला कस्मादास्ते ?

P. P. Ac. Gunratansuriji M.S.                Jin Gun Aaradhak Trust

(५) अण्डाकारभ्रमणस्य मर्यादाया नियन्त्रणं को नु खलु कुरुते ? इत्थं किमर्थं भवति ?

(६) पृथ्वी निराधाराऽऽकाशे कथमिव स्थातुं समशक्नोत् ?

(७) तामिमां पृथ्वीं को नु खलु भ्रामयति ? कर्तारं विना क्रिया ननु कथं भवितुमर्हति ?

(८) सत्यमेवाहोरात्रं (२४ घण्टापर्यन्तं) पृथ्वी स्वधुरि भ्रमन्त्येव सन्तिष्ठेत, तथा तत्साकमेव सूर्यस्येतस्ततोऽपि च भ्रमेत्तदास्मिन् व्यतिकरे कदापि कोऽपि च व्युत्क्रमो वा दुर्घटनोत्पातादिकं वा न भवेद्, परञ्च सर्वमपि च यथायोग्यं प्रचलेदेव, तदिदं नियन्त्रणं ननु को हि कुर्वाणः स्यात् ?

(९) पृथिव्या ऊर्ध्वं निराधारेऽन्तरिक्षे वायुयानेन वाऽन्येन केनापि च साधनेन गत्वाऽन्यस्मिन् कस्मिंश्चनापि स्थाने तत्कालमुत्तीर्य तत्र प्राप्तुं शक्यते किम् ?

(१०) पृथ्व्या दैनिकी गतिः कियती वर्तते ? सा च केन वा साधनेन निश्चिताऽक्रियत ?

(११) पृथिव्या वार्षिकी गतिः का ? तस्याः स्तरः किमाधारं चाधृतोऽस्ति ?

(१२) अथ च सूर्योऽपि तु स्वकीयेन परिवारेण (ग्रहमण्डलेन) साकमत्यन्तवेगेन कमप्यन्य'बिन्दुं' प्रति प्रविश-

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

ग्नास्ते । स विंदुः कथं ज्ञातः ? तथा तस्य घर्षणस्य वेगः कियान् वा कया रीत्या निरचीयत ? तथैव— "स्वकीयेन समस्तेन परिवारेण सह" इत्यस्य कोऽभिप्रायः ?

(१३) सूर्यो गतिशीलो वर्तते, प्रमाणं किम् ?

(१४) पृथ्वी ६६½ अंशात्मकं कोणं विधाय सूर्यासन्नं भ्रमति तदेतत् केन वा प्रकारेण निश्चितमभूत् ?

(१५) ६६½ अंशाः कथमज्ञायन्त ? न्यूनाधिकाः किमर्थं न ?

(१६) पृथ्वी ६६½ अंशेभ्यो न्यूनं वाऽधिकं वा कोणं न विदधातेति नियन्त्रणं कश्च विदधति ?

(१७) यदि च पृथ्वी सत्यमेव वेगेन भ्रमति चेत्तदा वायोर्धर्षणं कियद्वहु भवेन्नाम ? तत्र घर्षणमपि पश्चिमतः पूर्वं प्रत्येव भवितुमर्हेत् ।

अनेन सम्यगवगन्तुं शक्यते यद्धि '<u>पृथ्वी न भ्रमति, नैव भ्रमतीति ।</u>"

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

## गंभीरभावेन पठनीयम्

"वर्तमाने ह्यनेहसि भौतिकवादप्राधान्येन नव-नवीनशोधानां प्राचुर्येणाञ्जितचक्षुष्काः विचारका अपि विद्वांसः सत्यासत्यतत्त्वपरीक्षा—मानदण्डभूतां तत्त्वज्ञानोपज्ञ—विचारसरणिं विस्मृत्य स्वीयेन बुद्धि-प्राग्भारोत्थापिततर्कबलेनातीन्द्रियं सत्यतत्त्वं जिज्ञासन्तोऽपि आभासिकेषु च पदार्थेषु सुबद्धमूलास्थावन्तः भवन्ति ! ! !

याथार्थ्येन खलु भारतीयसंस्कृतेर्मार्मिकानवबोधमूलिकैषा स्थितिः, एतद्धि सत्याधिगतिबद्धकक्षैः धीधनैस्समुपासितगुरुचरणैः परिभाव्यम् ॥"

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

# भारता-मरीकयोः सूर्यप्रकाशान्तर–मीमांसा



लेखकः–

**मुनि–अभयसागरो गणो**
M.A.I.S.T.A. (दिल्ही)



P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

## 卐 निबंधगत-विषयाः 卐

| | | पृ० |
|---|---|---|
| * | भारताऽमरीकयोः सूर्यप्रकाशेऽन्तरं किमर्थं ? | ४३ |
| * | देव–गुरुप्रसादेनाऽ– धिगतमार्मिकविचारणा | ४४ |
| * | दिन–रात्रिगत– व्यवस्थान्तर– रहस्यम् | ४६ |
| * | सूर्यगतेः तत्प्रकाशस्य च भिन्नतास्वरूपम् | ४८ |

हृदि अवधारणीयम्

जिज्ञासाऽभिनिवेशरहिता
सम्यग्ज्ञानोपबृंहिता वृत्तिः
तत्त्वाधिगतिकारिका

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

## भारताऽमरीकयोः सूर्य–प्रकाशे ऽन्तरं किमर्थम् ?

शास्त्रेषु श्रद्धा-विश्वासावादधानानां पुण्यात्मनामपि सम्यक्त्वप्रबलमोहनीयतया, कालप्रभावात्तथा च निमित्तैस्तैस्तैः सम्यक्त्वेऽस्थिरत्वमागच्छेदिति सम्भवति ।

परन्तु तथाविधे समये जिज्ञासा-पूर्वकं, गीतार्थ–महापुरुषाणां निश्रया ज्ञानिनां वचनानां सङ्गतये प्रयत्नो यदि क्रियेत, तदात्मनः सम्यक्त्वस्य निर्मलत्वेन साकमन्येषामनेकेषां मनसि, सर्वज्ञमहापुरुषैः प्रोक्तेषु वचनेष्वनास्थाजननीनां महागम्भीराणां शङ्का-कुशङ्कानां प्रसरज्जालं दूरमपाकर्त्तुं शक्यते ।

एतदनुसारं गीतार्थपुरुषाणां चरणेषूपविश्य स एष प्रश्नोऽतीव गाम्भीर्येण विचारविमर्शयोग्योऽस्ति ।

"सूर्यस्य गतिः (सर्वाभ्यन्तरमण्डले) प्रतिमुहूर्तं ५२५१ योजनप्रमाणास्ते ।

तानीमानि योजनान्यपि च प्रमाणाङ्गुलानां शास्त्रीयाणि वर्तन्ते, ततो यदि ४८ मिनटात्मके समये सूर्यश्चेत् ५२५१ प्रमाणांगुलैः) योजनानि गच्छति, तदा भारतादमरीकाया प्रायेण प्रमाणांगुलैक–योजनमितायां दूरे सत्यां चापि १० तः ११ होराणामन्तरं कस्माद्भवति ?"

P. P. Ac. Gunratansuriji M.S.                Jin Gun Aaradhak Trust

## देव–गुरुप्रसादेनाऽधिगतमार्मिकी विचारणा

देवानां तथा गुरुजनानां कृपया विषयेणानेन सम्बन्धितानां च बहूनां गीतार्थ–महापुरुषाणामनुग्रहेण चैवमवबुध्यते यद्धि "सूर्यप्रज्ञप्ति–श्रीभगवतीसूत्र–बृहत्संग्रहणी–मण्डलप्रकरण–ज्योतिष्करण्डक–काललोकप्रकाश–प्रभृतिग्रन्थोद्धरणादीनां तथा च प्रत्येकं मण्डलस्य मुहूर्तगत्यादीनां सामान्यया स्थूलया चोपरितो दृष्ट्या विचारे कृते जटिला उद्ग्रथिता इव प्रतीयमानास्त इमे प्रश्नादयः—

"येऽन्विष्यन्ति निमज्य सागरतलं तैर्मौक्तिकं लभ्यते।"

इतिवन्मनाग्गम्भीरं विमृष्टे सति, गीतार्थमहापुरुषाणां सेवाप्रभावात्तत्त्वदृष्टेरभ्युदयेन समाहिता भवन्ति। तथाहि—

"शास्त्रेषु कृतानि वर्णनानि प्रतिविशिष्टया एकया विवक्षया वर्तन्ते, तानि यया विवक्षया कृतानि सन्ति, तां स्वध्यानपथेऽनवस्थाप्यापाततः प्रतीयमानोऽर्थः क्रियेत चेत्तदा बुद्धिः कुण्ठा भवेत्, भ्रान्तिं वा श्रयेत्तथा च श्रद्धाया अवस्थानं कठिनं भवेत्।

अथ चैकं महत्त्वपूर्णं तथ्यं ध्यानगम्यं कर्तुं युज्यते, यद्धि "श्रीनन्दिसूत्रा"दिष्वागमेषु नन्वित्थं निरूपितमास्ते-द्वादशाङ्गी द्रव्यार्थिकेन नयेन (अर्थेन) कदापि नाऽऽसीत्, किंवा न भवितुं शक्नोति, नैवं भवति, कालत्रयेऽप्यर्थतो द्वादशाङ्गी नित्याऽस्ति

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

त्रिकालाऽबाधिताऽस्ति, यथा च पर्यायार्थिकेन नयेन (शब्दतः) द्वादशाङ्गी तत्तत्तीर्थङ्कराणां शासनसमये रचना-सङ्कलनरूपेण नवीना भवति, अर्थाच्छब्दतो द्वादशाङ्गी अनित्याऽस्ति ।

अनेनाऽर्थतो द्वादशाङ्गीनयो योऽस्ति, स आस्ते । अर्था-दनन्ताभ्यश्चतुर्विंशतिभ्यः पूर्वतनैस्तीर्थङ्करैः प्रोक्ता अथवा वर्तमाने काले चरमतीर्थपतीनां प्रभुमहावीरपरमात्मनाऽऽगमा-स्तथैव महाविदेह-क्षेत्रमधिविहरमाणानां तीर्थङ्कराणां श्री-सीमन्धरस्वामिप्रभृतीनामागमाः, किंवा भविष्यत्काले भवि-ष्यतां श्रीपद्मनाभादीनां तीर्थङ्कराणामागमा अर्थतः समाना एव स्थास्यन्तीति तथ्यमिदं सुस्पष्टं भवति ।

अत एवागमेषु तत्तत्पदार्थानां वर्णनं भाष्यं व्याख्यानं कयाचिद्विशिष्टया मर्यादया निश्चितं भवति, तत्र देशकृतानां कालकृतानां वा परिवर्तनानामुल्लेखो न भवेत्तदिदं स्वाभाविक-मास्ते । पुनस्तथा कृते सति तत्तत्समयभाविनां देश–कालानां तथा च तत्तत्स्थानानामभिधानानि परिवर्तनशीलानि भूत्वाऽऽ-गमार्थदृष्ट्या शाश्वतं स्थातुं न शक्यन्ते ।

तथ्यमिदं पुरतो निधाय "भारताऽमरीकयोर्मध्ये ११ होराणां सूर्यप्रकाशस्यान्तरं किमर्थं भवति ?" प्रश्नस्यास्य विचारे क्रियमाणे नन्वित्थं प्रतीयते—

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

आगमेषु वर्णितस्य क्षेत्राश्रयिणः सूर्य-प्रकाशस्य व्यवस्था कस्याश्चिद् निश्चितरेखाया अपेक्षया ज्ञातव्येति ।

दिन-रात्रिगतव्यवस्थान्तररहस्यम् ।

अतो भरतक्षेत्रे यदा दिनं भवति, तदा महाविदेहे रात्रिस्तथ महाविदेहे यदा रात्रिर्भवति तदा भरतक्षेत्रे दिनमिति तथ्या धारेणाऽद्यतनयोर्भारता-मरीकयोर्मध्येऽहोरात्रान्तरेणामरीकां विदेहरूपेण स्वीकर्तुं शीघ्रतायाः किंवा शास्त्रीयव्यवस्थाय अनिश्चिततायाःशङ्का न कर्तव्या ।

यतो यया रीत्याऽद्यत्वे विषुववृत्तस्य रेखायास्तथा च कर्क रेखा-मकररेखयोर्निश्चितानां बिन्दूनामाधारेण विशिष्टं सुस्पष्ट गणितं क्रियते, परन्त्वन्यस्मिन् स्थले योग-वियोगात्मिक (प्लस-माइनस) पद्धतिः स्वीक्रियते । तथा च ग्रीनविच-वेध शालायाः समयं सिद्धान्त-सिद्धं (स्टेंडर्ड) मत्वा प्रत्येकं स्थले स्थानीये (लोकल) समये पृथक्-पृथक्त्वेऽपि च घटिकायन्त्रे ष्वेकसमानो नियमः परिपाल्यते । एवमेवानयैव रीत्या ज्ञानिनं दक्षिणार्ध- भरत क्षेत्रस्य केन्द्रे स्थितायामयोध्यायामुपरिभूत्वा गच्छन्तीं रेखां सिद्धां गणयित्वा तद्विवक्षया सूर्य-चन्द्रादीन तत्सम्बन्धिनां सर्वेषामपि ग्रहाणां (ज्योतिष्पिण्डानाम्) गणित निर्दिदिशुः । वयमद्यत्वे बहुन्तरमनुभवामः, अस्माभिस्तस्या- न्वेषणानुसन्धानस्यावश्यकताऽऽस्ते यत्-वयं तस्या निश्चिताया रेखायाः पूर्वभागे स्मः किंवा पश्चिमभागे ? उत्तरतो वर्तामहे

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

ऽथवा दक्षिणतः ?

तदनुसारं शास्त्रीये गणिते योग-वियोगौ विधाय समन्वयं साधयेम।

सूर्यगतेः तत्प्रकाशस्य भिन्नतास्वरूपं

पुनश्चैकं तथ्यमन्यदपि च ध्याने रक्षणीयमास्ते, यद्धि शास्त्रेष्वेकस्मिन् मुहूर्ते ५२५१ योजनप्रमाणाया गतिनिर्दिष्टाऽऽस्ते, सा सूर्यस्य गतिर्वर्तते, परन्तु सूर्य-प्रकाशस्य गतिस्तु यस्मिन् यस्मिन् क्षेत्रेऽथवा वस्तुनि सः प्रकाशो निपतति, तस्य ह्रस्व-दीर्घाकारापेक्षया भिन्न-भिन्नरूपो भवेत्।

यथा घटं कुशूलं (धान्यसंग्रहार्थं मृदा निर्मितं 'वैरल'-सदृशाकारं लम्बगोलं वस्तु, कोठीति लोके प्रसिद्धं) द्वयमपि मध्ये निधाय कोऽपि मनुष्यो दीपकमादाय गोलचक्रं (वृत्ताकारं) परिभ्रमेत्तदा तस्य मनुष्यगत्यामेकसमानायामपि सत्यां घटस्य प्रतिबिम्बच्छाया शीघ्रतरं परिभ्रमेत्, तथा कुशूलायाः प्रतिबिम्बच्छाया शनैःशनैर्भ्रमेत्। एवमेव प्रकाश्यस्य गतेरपेक्षया प्रकाशस्य गतिः स्वतन्त्रा प्रतीयते।

ततः सूर्यस्य गतेः शास्त्रीये माने सर्वत्र समानेऽपि सति वयं यस्मिन् संसारे निवसामः, स संसारो दक्षिणार्ध-भरत-क्षेत्रस्य मध्यबिन्दोर्नैर्ऋत्यकोणे १८५००० क्रोशमिते दूरे सर्वतः समुद्रेणावेष्टितानामनेकेषां द्वीपानां समूहसदृशो विद्यते।

अतः सूर्यस्य गतौ समानायां सत्यामपि तेषु तेषु स्थानेषु

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

सूर्यस्य प्रकाशः शीघ्रमथवा विलम्ब्य निपतेदिति सम्भवति । विशेषरूपतस्तदिदं तथ्यं प्रत्यक्षरूपेण प्रयोगात्मकैः साधनैः समधिकं स्पष्टतया बुद्धिग्राह्यं स्यात्तथाऽऽस्ते। अत्र त्वेतत् केवलं सुविज्ञानां प्रजानां हिताय किञ्चिद् रुच्युत्पादनार्थं प्रश्नस्याऽस्य समाधानस्याऽतीव स्थूला रूपरेखा निर्दिष्टाऽऽस्ते।

तदिहान्येऽपि च केचन विषया विचारणीया भवितुमर्हन्ति।

अद्य शिक्षाया भौतिकवादस्य च प्रतापात्नव्यानां प्रजानां मनस्येवं किमपि बद्धमूलं भवति—"शास्त्राणि तु बुद्धेराधारेण लिखितानि सन्ति, ततस्तेषां लेखनसमये तत्कालीना ऋषि-मुनयो यावज्जानन्ति स्म तावल्लिलिखुः। अतः शास्त्राणि युग-युगेभ्यः पूर्वतनानि प्राचीनानि नाऽद्यतने प्रगतिशीले समये ननूपयोगीनि वर्तन्ते, इत्यादि।"

परन्तु सत्यमिदमास्ते यद् विज्ञानं तु धर्मस्य मूलाधार इव तत्त्वज्ञानस्यैकः सहस्रांशोऽपि नाऽऽस्ते। तत्त्वज्ञानं विश्वस्याऽनेकेषां सिद्धान्तानां समूहरूपं विद्यते। यदा विज्ञानं तु साधनानां शक्तेश्च सीम्न्यवलम्बमानं विद्यते। केषुचिद् विषयेषु कृतानां प्रयोगानां समूह-स्वरूपमास्ते। अतो हि विज्ञाने यद्वर्तते, तावच्छास्त्रेषु बीजरूपं भवत्येव। तत्त्वज्ञानस्य बहूनां विषयाणां बोधायातः परं विज्ञानेन बहु मन्थनं कर्तव्यं स्यात्॥

◉

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

# जैनशास्त्राधारेण विश्वदर्शनम्



लेखकः–
मुनिअभयसागरो गणी
F.D.I.G. (हैद्राबाद)

P. P. Ac. Gunratansuriji M.S.    Jin Gun Aaradhak Trust

## 卐 निबंधगत—विषयाः 卐


| | पृ० |
|---|---|
| * भारतवर्षस्य सागरयात्रासाहसवृत्तं | ५१ |
| * विदेशीयानां कूटनीतिप्रसरः | ५२ |
| * पाश्चात्त्यैरारोपितायाः लघुताग्रन्थेः स्वरूपम् | ५३ |
| * जैनशास्त्राधारेण वर्तमानविश्व-स्वरूपनिर्वचनम् | ५५ |
| * वर्तमान-विश्वस्य जलपरीतत्वे ऐतिह्यघटनाद्वयम् | ५६ |
| * उपसंहारः | ५८ |


P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

भारतवर्षस्य सागरयात्रा–साहसवृत्तं ।

मनुष्यस्य ज्ञान–शक्तिः साधनेष्ववलम्बिता वर्तते । यादृशानि यावन्ति च साधनान्युपलभ्येरँस्तदाधारेण ज्ञानस्य क्षेत्रं दीर्घं विस्तृतं च भवति ।

अतः सोऽपि चैकः समयो बभूव, यदा भारतस्य जल–पोत–यात्रानिष्णाता व्यापारिणस्तथा च साहसिका लोका धैर्यस्य शम्बलमादाय "समुद्र–देवो जयतु !" इत्याघोषयन्तो ऽपारं सिन्धुं प्रविश्य रत्नद्वीप–बर्बरद्वीपसदृक्षान् दूरं-सुदूरं स्थितान् प्रदेशान् यावत् प्राप्य, सफलं व्यापारं विधाय, धन–सम्पदं प्रचुरामादाय प्रतिनिवर्तन्ते स्म ।

अधुनातनस्य यान्त्रिक–युगस्येव साधन–सामग्री तदानीं समये न बभूव, अदम्येषु जलाघातेषु, वायोश्च भाग्यच-क्रस्य खेलालीलासामुद्रिकेषु विप्लवेषु, भीषणेषु प्रभञ्जन–वात्या–चक्रावर्तेषु च प्राणपणेन क्रीडयते स्म; परन्तु क्रीडामनोवृत्तिकाः साहसिका व्यापारिणो जनाः समुद्रस्य क्रोधावेशस्य भीषणाऽऽघाते जलवाहनं यदि नष्टं–भ्रष्टं सत् खण्डं खण्डं विनश्येत्तथा केवलमेकं वाऽर्द्धिं वा काष्ठपट्टिका मात्रं हस्तगतमवशिष्येत, तथापि च तत्साहाय्येन तटभूमि-मागत्य भूयोऽपि साहससम्पत्तेर्बलात् सर्वामपि सामग्रीं संगृह्य

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

समुद्रयात्राया आनन्दमनुभवन्ति स्म। इत्थंविधा मृत्योर्मुख-गह्वरं प्रति नयन्त्यः साहसिक्यो यात्राः समये-समये भूयो भूयो भवन्ति स्म।

प्राचीनेषु ग्रन्थेषु कश्चन सप्तवारान्, कश्चिच्चैकादश-वारानेवंविधाः समुद्रयात्राः प्राणपणेनापि कृतवानित्येवंप्रकारा उल्लेखाः समुपलभ्यन्ते।

प्रस्तुत-प्रसङ्गे विचारणीयमेतदास्ते यदित्थंभूतानां साह-सिकीनां यात्राणां रोमाञ्चकतया परिपूर्णे समये तत्कालीन-स्य संस्कृतिसम्पन्नस्य मानवस्य ज्ञानशक्तिर्भारतभूमेः परःसह-स्रेभ्य एव नहि, परं च लक्षाधिकक्रोशेभ्यो दूरे स्थितान् देशान् यावत् प्रसृता-विऽऽतता चाऽऽसीत्।

विदेशीयानां कूटनीतिप्रसरः

परं ईसुख्रिस्तस्य चतुर्थ्याः शत्या अनन्तरं, काल-क्रमेणैवं-विधानां साहसानां कृतेऽपेक्षितानां तेजस्विमानवानां नैयून्येन, समुद्रस्य तादृशानां विकट-मार्गाणां ज्ञानं तत्तकुशल-नाविकैः तथा च पोतश्रमिकैः सार्द्धमेव विगन्तुमारेमे। परलोकं गतेषु तेषु प्रचण्ड-भीषणः सागरः शनैः शनै क्रमेणाधिकाधिकं दुर्ज्ञयोऽगम्यश्च जायमानोऽभूत्।

अन्ततस्तथाविधा परिस्थितिः सञ्जाता, यद्धि भारताद् बहिः स्वल्पं दूरं यावदपि व्यापारार्थं यात्रासाहसस्याऽभावो भवितुमारभत।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

एवंविधे ह्यवसरे कूटनीतिज्ञानां लोकानां वाणिज्य–व्यवसाय–वृत्तिकमानसवत्याः व्यापारमण्डलीतो राजसत्तायाः सिंहासनाधिरोहणस्य मलिनेच्छा समुत्पेदे। तदाकांक्षायाः मारम्भिके कार्यक्रमरूपे ईसवीयस्य सन् १४९२ वर्षस्य तत्कालीनेन धर्माधिकारिणा 'पोप' इत्याख्येनोपक्रान्तः समस्तविश्वस्यान्वेषणस्य विषयोऽध्यत्वे विद्यालयानां पाठ्यपुस्तकेषु माप्यते। तदाधारेणाऽखिलं विश्वं स्वाधिकारान्तः गणयित्वा देशकालानुगुण्येन ते भिन्न-भिन्नस्थलेषु भिन्ना भिन्ना रीतीः प्रयोक्तुमारेभिरे।

तत्र च प्रबलाध्यात्मिकताबलपूरिते भारते नास्तिकवादस्य मूलाधारत्वेन प्रक्षिप्तं "पृथ्वीयं गोलाकारा वर्तते" इति सिद्धान्तं तथा च "सा भ्रमति" इति च सिद्धान्तमेतमात्मनो धारणां सफलयितुमुपयोगिनमवधार्य, विज्ञानवादस्य चाकचक्यमारोप्य भारतीयानां मस्तिष्के कालबलादागताया नैतिक्या भीरुताया बौद्धिक्याः कातरतायाश्च लाभमादातुं पाठशालानां पाठ्य-पुस्तकानां माध्यमेन प्रचारयितुमारब्धवन्तः।

पाश्चात्त्यैरारोपिताया लघुताग्रन्थेः स्वरूपम्।

तत एवाऽध्यत्वे ऽधिकांशानां लोकानामियं धारणास्ति संजाता "अलम्! या काऽपि चाऽऽस्ते सा खल्वेतावत्येव जगती विद्यते! पौरस्त्ये गोलार्धे पंचखण्डास्तथा पश्चिमे गोलार्द्धेऽमरीका–खण्डः, केवलमेतेषां षण्णां खण्डानामेव विश्वं वर्तते। तन्नाऽन्य किमपि वर्तते।"

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

अनेन प्राचीनभारतीयानां समुद्रयात्रायाः साहसिका वृत्तान्तास्तथा भारताल्लक्षाधिकक्रोशदूरस्थितेषु द्वीपेषु भारतीयै रेवोद्धूतानां ध्वजानां विजयगाथादयोऽधुना 'सहस्ररजनीचरितस्य 'अरेबियन नाइट्स' इतिसंज्ञ–कल्पितकथाकोशस्य] कथा इवाऽथवा 'शेखचिल्लीमहाशयस्य' कल्पनातरङ्गतुल्या परिगण्यन्ते ।

विज्ञानवादिभिः शिक्षितानां मनस्येवंविधा मुद्रोट्टङ्किताऽऽस्ते "दृश्यताम् भोः ! त इमे विदेशीया लोकाः कोलम्बस–मेगेलनसदृक्षाः कीदृशाः साहसिकाः सन्ति यात्रिणः ? ये हि स्वप्राणानप्युपेक्ष्य समुद्रं पादाक्रान्तं कृत्वा नवनवं शोधकार्यं कुर्वाणाः सन्ति । तथा च वयं किञ्चिदपि नाकरवाम, तथा वयं किमपि कर्तुं प्रभवेम तथाविधमपि नास्ति !"

एवंविधानां हीनता-ग्रन्थीनां सृष्टिः शिक्षायाः प्रचारस्य च बलेन कृतवन्तः ।

परन्तु वास्तविकेऽर्थे तदिदं सर्वं स्वार्थमलिना क्रीडालीलारूपं वरीवर्ति ।

अद्यतनीयं प्रत्यक्षं परिदृश्यमाणा पृथिवी केवलं ८००० माइलपरिमाणास्ते, सा चेयं २५००० मा० परिधिवती वर्तते । एतावन्मात्रेण भारतदेशस्यास्य समृद्धिदर्शनं भवितुं न शक्यते। भारतवर्षं त्वतीव सुविशालोऽस्ति देशः ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

– दृश्यताम्, एतत्कृते शास्त्रीया मान्यता काऽऽस्ते ? अस्य विचारं कुर्याम !

## जैनशास्त्राधारेण वर्तमान विश्वस्वरूपं

समस्तमपि विश्वं कटयां हस्तौ निधाय पादौ च विस्तार्य तिष्ठतः पुरुषस्याकार इव विद्यते तथा चास्य १४ रज्जुमितं प्रमाणं चास्ति ।

१–रज्जुः=असंख्यानां कोटिकोटियोजनानां मानम् । अस्य १४ रज्जु–प्रमाणस्य विश्वस्य मध्यभागेऽसंख्यानां द्वीप–समुद्राणां वर्तुलमास्ते । तस्य सर्वस्य मध्यभाग एव जम्बूद्वीपो विद्यते । यस्य प्रमाणं पूर्व–पश्चिमतः–उत्तर–दक्षिण–तश्च लक्षयोजनमितमस्ति ।

तस्य जम्बूद्वीपस्य मध्यभागे मेरुपर्वतोऽस्त्यवस्थितः । तत्पूर्व–पश्चिमदिशि महाविदेह–क्षेत्रं वर्तते । तथोत्तरे–एकः पर्वत एकं क्षेत्रं, एवं क्रमेणत्रयः पर्वतास्त्रीणि क्षेत्राणि विद्यन्ते । इत्थं सम्पूर्णे जम्बूद्वीपे सप्त क्षेत्राणि षट् पर्वताश्च वर्तन्ते ।

तत्र दक्षिणदिशि यदन्तिमं क्षेत्रमस्ति तदभिधानं भरत-क्षेत्रमिति वर्तते । तस्य पूर्व–पश्चिमयोः प्रमाणं १४४७१ $\frac{६}{१९}$ योजनात्मकमास्ते । तथोत्तर–दक्षिणयोः प्रमाणं ५२६ $\frac{६}{१९}$ योजनात्मकं विद्यते । तस्य भरतक्षेत्रस्य मध्यभागे वैताढ्यनामा पर्वतोऽस्ति । तस्योच्चता २५ योजनमितास्ते । उत्तर–

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

दक्षिणयोः विस्तार ५० योजनानि, तथा पूर्व-पश्चिमयोः-दीर्घता १०७२ ११/१९ यो० प्रमाणा वर्तते ।

तस्माद् भरतक्षेत्रस्य भागद्वयं जातमास्ते, १ उत्तरार्धे भरतक्षेत्रम् २ दक्षिणार्धे भरतक्षेत्रं चेति ।

दक्षिणार्द्धभरतस्य पूर्व-पश्चिमयोः प्रमाणं ९७४४-११/१९ योजनमितं विद्यते ।

अस्य दक्षिणार्ध-भरतक्षेत्रस्य यथार्थतो हि मध्यभागे-अर्थाद् वैताढ्यपर्वतात् ११४ योजनमिते ११/१९ दूरे ऽयोध्या-नगरी वर्तते । तस्या नैर्ऋत्यकोणे (दक्षिण-पश्चिमयोर्मध्ये) १,८५,००० क्रोशमिते दूरान्तरे वयमस्थिताः स्मः । तदिदं वर्तमानं विश्वं सुविशालस्य समुद्रस्य मध्ये लघु-महतामनेक-द्वीपानां समूहा इव विद्यते ।

अत एव हि कविशूरस्य धुरन्धरस्य विदुषः श्रीदीप-विजयकविराजस्य श्री अष्टापदमहातीर्थस्य पूजापद्धतौ निम्न-लिखितानुसारमुल्लेखोऽस्तिः-

" सिद्धगिरिथी छे वेगलो रे,
एक लाख पंचाशी हजार रे । " इति ।

अस्माद् यत्र वयं निवसामः, स ८००० मील प्रमाणमितो भागः दक्षिणभारतस्य मध्यबिन्दुरूपोऽयोध्याया नैर्ऋत्यकोणे

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

१,८५,००० क्रोशमिते ऽन्तरे (१ क्रोशः २।। मा० प्रमाण गणनया ४६,५००० मा० मिते, तथा २।।। मा० गणनया ५१,१२५० मा० मिते) सर्वतो जलेनावेष्टितं लघु–महता-मनेकेषां द्वीपानां समूहस्वरूपं वर्तमान–विश्वमरूपेणास्ते, इत्येवम् निश्चयो भवति ।

## वर्त्तमानविश्वस्य जलपरीतत्वे ऐतिह्य–घटनाद्वयम्

वस्तुतस्तु शास्त्रमर्यादानुसारं भरतक्षेत्रे क्षारं जलं न कदापि भवितुमर्हति, समुद्रस्तु द्वीपाद् बहिर्भवति, तथाप्यद्यत्वेऽस्माकं ज्ञातविश्वस्य समन्ततः क्षारं जलं दृश्यते,तत् किं किमर्थञ्च?तदे-तस्यावबोधाय निम्नोल्लिखितं घटनाद्वयं विचारणीयं भवति—

(१) द्वितीयतीर्थङ्करस्य श्रीअजितनाथप्रभोः समये द्वितीयस्य चक्रवर्तिनः सगरमहाराजस्य ६०,००० पुत्राः अष्टापदतीर्थस्य सुरक्षार्थं दण्डरत्नेन सर्वतः परिखां चरव्नुः, तस्यां परिखायां गङ्गानद्याः कुल्यारूपेण जलमानीयाऽपूरयन् । अत्रान्तरे नाग-कुमारस्य भवनपर्यन्तं तस्य जलस्य प्राप्तेः समुत्तेजितो नाग-कुमारस्येन्द्रस्तत्रागत्य षष्ठिसहस्रपुत्रान् प्रज्वाल्य भस्मसाच्चकार। ततस्तेषां (शवानां) दाह संस्कारार्थं कस्यापि न शेषत्वात्तद्गङ्गाया जलं वृद्धिं गत्वा सर्वतः प्रलय–ताण्डवं कर्तुमारेभे । तदनु भगीरथः सगर–चक्रवर्तिन आज्ञया तं गङ्गाप्रवाहं संयम्य प्रत्यावर्त्त्य च पुनः जलधिगमकरोत् ।"



P. P. Ac. Gunratansuriji M.S.

Jin Gun Aaradhak Trust

(२) "अथ च प्राणपणेनापि गङ्गानद्या प्रवाहमानीया-ष्टापदरक्षण-तत्परस्वपुत्रव्रजवत् श्रीशत्रुञ्जयस्य रक्षाया भाव सगरचक्रवर्तिनःजागरिता बभूवुः । तदनुसारं सः स्वाधी-स्थितान् व्यन्तरदेवान् जम्बूद्वीपस्य प्राकारस्य दक्षिणद्वारेण लवणसमुद्रमानेतुमादिदेश। तदनुसारं सः समुद्रो दैव्या शक्त्या भरतक्षेत्रे लघुमहतष्टङ्कण-बर्बर-चीन-भोटादीन्नानादेशान् विध्वं-सयन् शत्रुञ्जयगिरेर्दिशि प्रसह्य प्रवेशचेष्टया विविधदेह-विप्लवोपद्रवांश्च कर्तुमारेभे । तावदेव सौधर्मेन्द्रासनं विचचाल । स च धावं धावं तथा न कर्तुं सगरचक्रवर्तिनं प्रबोधयामास । प्राचीकथयच्च यत् इत्थमाचरणाच्छ्रीअष्टापदतीर्थमिव श्रीशत्रुञ्जय गिरिरपि चाऽगम्यः, सामान्यजीवेभ्यो दुर्लभश्च भवेदिति, समवधायतत् सगरक्रवर्ती समुद्रं तत्रैवावरोद्धुं देवानाज्ञापयामास ।

परिणामतः समुद्रो यावद् भरतक्षेत्रं प्रविवेश, तावदेवाऽत्र-तस्थे, तथा स एव काल-क्रमेणात्यन्तं परिवर्तितोऽद्यत्व उत्तर-दक्षिणध्रुवस्याभेद्यो दुर्गमश्च हिमविस्तारः प्रशांतमहासागर-अटलान्टिकादिसमुद्ररूपो बभूव ।"

## उपसंहार :

आभ्या द्वाभ्यामपि घटनाभ्यां वर्तमानं विश्वं सर्वतः समुद्रेणावेष्टितं सत् लघु-महतामनेकेषां द्वीपानां समूहरूपमास्ते । सा च पृथ्वी नन्वस्माकं ज्ञानसीम्नो लघुमर्यादारूपिण्यधुनावधि वर्तमानास्ते इति ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

अनेन स्पष्टमवगतं स्याद्यद्धि ८००मीलप्रमाणव्यासवती तथा २५००० मीलप्रमाणपरिधिवती सैषा जगती— "अखिलविश्वस्य (१४ रज्जुप्रमाणस्य) मध्यभागेऽवस्थितानामसंख्यानां द्वीप–समुद्राणां मध्यविन्दुरूपस्य जम्बूद्वीपस्य दक्षिणाञ्चले विद्यमानस्य दक्षिणार्धभरतक्षेत्रस्य मध्यविन्दोर्नैर्ऋत्यकोणे १८५०००क्रोशमिता भवेत्" इत्थं प्रतिभाति ।

अनया रीत्या शास्त्रीयां मान्यतां योग्येन विधिनाऽवबुध्य, वैज्ञानिकीनां कल्पना–धारणानां व्यामोहैः वैदेशिकैः पायितस्य हीनताग्रन्थेर्बीजरूपाः मान्यता निरस्य, प्रस्तुतस्य "वयं क्व नु कुत्र चास्महे ?" इत्यस्य प्रश्नस्य भौगोलिक्या दृष्ट्या समाधानप्राप्तेः प्रयत्न कर्तव्यः ॥

सम्यक्.......चिन्तनीयम् ! ! !

शास्त्रावबोधः

मतिप्राग्भाराधीनो नहि !

किन्तु विनीततादिपरिकर्मणा–

राजितमतिबलाधीनः ॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

## सम्यगवधारयन्तु !!!

"ज्ञानं हि चेतन–गुणः, तत्प्राप्तिः चैतन्य-विकासाधीना, पौद्गमिकेन्द्रिय–मानसशक्तिविकासेन न हि ज्ञानाप्तिः नियता भवति ।

तत्वज्ञानं हि चैतन्यविकासप्रयोजकं, विज्ञानं हि पौद्गलिकविकासाधीनम् ।

गुरुचरणवासोपबृंहितमतिना ।

मुमुक्षुणा सम्यगेतत् परिभाव्यं ॥

P. P. Ac. Gunratansuriji M.S.                Jin Gun Aaradhak Trust

# जैनग्रन्थेषु
# पृथिव्या आकार-गति-मीमांसा



निबन्धकः
**डॉ. रुद्रदेवः त्रिपाठी**
एम. ए., पी. एच. डी.

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

## 卐 निबन्धान्तर्गतविषयाः 卐


पृ०

* जैनग्रन्थाः ६३

* विश्वसम्बन्धिनी
मान्यता ६३

* आगमेषु
पृथ्वी तदाकारश्च ६५

* आधुनिकी
वैज्ञानिकी दृष्टिः ६८

* आगमेषु
पृथ्व्याः स्थिरत्वम् ६९

* मनोमन्थनस्या—
वश्यकता ७१


P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

## जैनग्रन्थाः

जैनसम्प्रदायस्य विविध–ग्रन्थेषु मूलरूपेण सम्मानिता ग्रन्था 'आगमाः' सन्ति। ईसातः पूर्वं षष्ठ्यां शत्यां भगवतो महावीरस्य समयादेव विभिन्नाभिर्वाचनाभिः सुरक्षितानामागमानां दिगम्बर–श्वेताम्बरादिमार्गानुयायिनः समानेन रूपेणादरं कुर्वन्ति। एतेषामागमानां संख्याविषये यद्यप्यस्ति परस्परं कश्चन मतभेदः, परं तेषु निहितानां शील–सदाचार–विचार–समन्वय–त्रिभुवननिर्माण–सृष्टितत्त्व– कर्म-संस्काराऽध्यात्मतत्त्वानामुपदेशपरम्पराविषये नास्ति कस्यापि विरोधः। एते आगमा दिगम्बर–सम्प्रदायाचार्याणां मते द्वादशाङ्गीनामागम-सूत्रयुगलानां च रूपेण स्वीकृताः सन्ति, श्वेताम्बरमतावलम्बिनामाचार्याणाञ्च सम्मतौ ११ अङ्गानि, १२ उपाङ्गानि, ६ छेदसूत्राणि, ४ मूलसूत्राणि, १० प्रकीर्णकाः, २ चूलिके चैवमादय ४५ आगमाः सन्ति।

उपर्युक्तेष्वागमेषु क्रमशोऽन्यान्यविषयैः सह लोकानां तेषामाकारस्य, तिर्यग्लोक–जम्बूद्वीप–भरतक्षेत्रप्रभृतीनां यद् वर्णनमुपलभ्यते, तस्य मननेन ज्ञायते यत् 'पृथिव्या आकारो नास्ति गोलः' यथा हि वर्तमानं विज्ञानं प्रकटयति।

## विश्वसम्बन्धिनी मान्यता

जैनागमेषु समस्तस्य विश्वस्याकारः कट्यां हस्तौ निधाय तथा पादौ प्रसार्य स्थितवतः पुरुषस्य सदृशो विद्यते। प्रमाणञ्चास्य १४

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

रज्जुमितम्। अत्र रज्वा अर्थोऽसङ्ख्यकोटि–योजनरूपो विद्यते।

अस्य चतुर्दशरज्जुमितविस्तृतस्य विश्वस्य मध्यभागेऽसङ्ख्यातद्वीपानां समुद्राणाञ्च वर्तुलं वर्तते। तेषां सर्वेषां मध्ये जम्बूद्वीपोऽस्ति, यस्य प्रमाणं चतसृषु दिक्षु लक्षयोजनं विद्यते। तस्य च जम्बूद्वीपस्य मध्ये मेरुपर्वतस्तथा तस्य पूर्वपश्चिमे भागे महाविदेहक्षेत्रम्, उत्तरस्याञ्चैकः पर्वतः क्षेत्रमेकञ्चैवं त्रयः पर्वतास्त्रीणि क्षेत्राणि सन्ति। एवं जम्बूद्वीपे सप्त क्षेत्राणि षट् पर्वताश्च राजन्ते।

तेषु दक्षिणस्यां दिशि यदन्तिमं क्षेत्रमस्ति, तन्नाम 'भरतक्षेत्र' मिति। अस्य क्षेत्रस्य प्रमाणं पूर्व-पश्चिमयोः १४४७१ योजन १९ मितं अस्ति। उत्तर-दक्षिणयोः प्रमाणं ५२६ १९ योजनमितं विद्यते।

अस्य भरतक्षेत्रस्य मध्यभागे वैताढ्यपर्वतो राजते, यस्योच्चता २५ योजनानि, उत्तर–दक्षिणयोरायामो ५० योजनानि पूर्व-पश्चिमयोरायामश्च १०७२–$\frac{१२}{१९}$ योजन-प्रमाणः। इदमेव कारणं यदस्ति भरतक्षेत्रं भागद्वये विभक्तम्।

१-उत्तरार्धभरतं. दक्षिणार्ध-भरतमिति।

दक्षिणार्ध-भरतस्य पूर्वापरप्रमाणं ७७४४–$\frac{१२}{१९}$ योजनं तथोत्तर-दक्षिणप्रमाणं २३८$\frac{३}{१९}$ योजनमितम्। दक्षिणार्धभरतस्य मध्ये वैताढ्यपर्वताद् १४$\frac{११}{१९}$ योजनदूरेऽयोध्या नगरी विद्यते। ततो नैऋत्यकोणे दक्षिणपश्चिमयोर्मध्ये ४६२५०० मीलदूरभागे इदं वर्तमानं विश्वं विशालस्य समुद्रस्य मध्येऽनेकेषां लघु–बृहद्द्वीपानां समूहवदस्ति।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

एतेनेदं स्पष्टं भवति यद् "वयं यत्र वसामः सः तत् पाश्चात्य-वैज्ञानिकानां धारणानुसारं ८००० मीलमितो भागः किल दक्षिणभरतस्य मध्यबिन्दुरूपाया अयोध्याया नैऋत्यकोणे ४६२५०० मीलदूरे परितः पानीयेनावृतानां लघु–बृहदनेकद्वीपानां समूहशालि वर्तमानं विश्वमस्तीति ।"

## आगमेषु पृथिवी तदाकारश्च

आगमेषु यादृशी चर्चा विश्वस्याकृतिविषये तदायामविषये तदन्तः-स्थित–समुद्र–द्वीपसमूहादीनां विषये च विद्यते तादृश्येव चर्चा पृथिव्या आकारविषयेऽपि समीचीनेन प्रकारेण विहिताऽस्ति । तथाहि—

'स्थानाङ्गसूत्रस्य' अष्टमे स्थाने 'अट्ठ पुढवीओ' इति कथयित्वा पृथ्वीनामष्टकं वर्णितं, यासु सर्वाभ्यो लघ्वी 'सिद्धशिला' वर्तते या चोपरितने लोकेऽस्ति । शिष्टा अन्याः १–रत्नप्रभा २–शर्कराप्रभा ३–वालुकाप्रभा ४–पङ्कप्रभा ५–धूमप्रभा ६–तमःप्रभा ७–महातमःप्रभा चेति सन्ति । इमाः सप्ताऽपि नीचैर्लोके सन्ति । आसु प्रथमायाः पृथिव्या ऊर्ध्वो भागस्तिर्यग्लोकेऽस्ति, यदुपरि वयञ्च संस्थिताः स्मः । पृथ्वी एकैवास्ति, परं जल–स्थलानां विभिन्नावेष्टनवशादसङ्ख्येयेषु भागेषु विभक्ता विद्यते । जैनसूत्रेष्वस्या महत आकारस्य अचलमर्यादायाश्च स्वरुपं विशदीकृतम् ।

एतादृशानां समस्तानां वर्णनानामुपलब्धये आचाराङ्ग–सूत्रकृताङ्ग स्थानाङ्ग–समवायाङ्ग –भगवतीप्रभृतिसूत्राणि तथा 'ऽऽवश्यक–विशेषावश्यकभाष्य –अनुयोगद्वार—जम्बूद्वीपप्रज्ञप्ति–जीवाभिगमसूत्र–

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

द्वीपसागरप्रज्ञप्ति-प्रश्नव्याकरण-लघुक्षेत्रसमास-बृहत्क्षेत्रसमास—जम्बूद्वीप-समास-क्षेत्रलोकप्रकाश-तत्त्वार्थसूत्राद्यनेकेषु ग्रन्थेषु विकीर्णायाः सामग्र्याः सङ्कलनमभीष्टम् । प्रस्तुते निबन्धे संक्षिप्य कियन्तिचित् प्रमाणानि समुपस्थाप्य तेषां समीक्षणं विधास्यामः ।

जीवाभिगमसूत्रे पृथिव्या श्रो आकारचर्चाप्रसङ्गे कथितमस्ति—

"इमा णं भंते ? रयणप्पभापुढवी केवइया बाहल्लेणं पण्णत्ता ? गोयमा ! इमा णं रयणप्पभा पुढवी असिउत्तरं जोयणसहस्सहस्सं बाहल्लेणं पण्णत्ता ।"

एतदनुसारमियं पृथ्वी रत्नप्रभानाम्नी अशीतिसहस्रोत्तरैक-लक्षयोजनमितबाहल्यशालिनी प्रोक्ता । तत्रैव पृथिव्या आयामस्य परिधेश्च प्रमाणमेवं प्रस्तुतमस्ति—

" इमा णं भंते ! रयणप्पभा पुढवी केवइयं विक्खंभेण पण्णत्ता ? गोयमा ! असंखेज्जाइं जोयणसहस्साइं विक्खंभेणं असंखेज्जाइं जोयणसहस्साइं परिक्खेवेणं पण्णत्ता ।"

एतदनुसारं पृथिव्या आयामः परिधिश्चोभावप्यसंख्यातयोजनमितौ वर्णितौ ।

उपर्युक्तः परिधिर्गोलाकारवानस्ति । तस्य प्रमाणं चैवमास्ते—

"इमोसे णं भंते ! रयणप्पभाए पुढवीए घणोदहिवलए किंसंठिए पण्णत्ते ? गोयमा ! वट्टे वलयागारसंठाणसंठिए पण्णत्ते । जे णं इमं रयणप्पभं पुढवीं सव्वओ समंता संपरिक्खित्ता णं चिट्ठइ ।"

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

एतदनुसारं प्रत्यक्षं दर्शनीयेयं पृथ्वी बहिरन्तर्गोलाकारा हस्तकङ्कणिकेव संस्थानवती प्रोक्ता । स एव घनोदधिवलयः पृथ्वीमेतां सर्वत आवृत्य स्थितः ।

एतैः प्रमाणैरिदं स्पष्टं भवति यदस्या रत्नप्रभायाः पृथ्व्याः स्थूलताऽतीव न्यूना, तथाऽऽयामश्चातीव विस्तृतः । एतदेवास्याः स्थाल्याकारतायाः प्रमाणम् । इदमेव लक्षणं रत्नप्रभायाः पृथ्व्याः तस्याः कन्दुकवत् गोलाकारतां खण्डयति, तथा तृतीयेन प्रमाणेन तस्याः परिधेःस्थालीवत्गोलताविषयेऽपि प्रकाशः प्रतीयते, अतो जैनागमानुसारं पृथ्वी स्थाल्याकाराऽस्ति, न तावत् कन्दुकाकारा ।

एवं जम्बूद्वीपवर्णनप्रसंगे जम्बूद्वीपस्याकृतिसूचकाः शब्दाः वट्ट–तेल्लापूय–रथचक्रवाल–पूर्णचन्द्र–स्थाली–झल्लरिका––प्रभृतयोऽपि जम्बूद्वीपं स्थाल्याकारं सेधयन्ति ।

वर्तमाना पृथ्वी जम्बूद्वीपस्याऽस्यैवान्तर्गतभरतक्षेत्रीय–मध्यखण्डस्यैव लघीयानंशः जलधिमध्यान्तर्गतद्वीपसमूहरूपः ।

अतः सा कन्दुकवद् गोलाकारा नास्त्यपि तु नानाकृतिभाग्द्वीपसमूहरूपा वर्तमानज्ञायमाना पृथ्वी प्रतीयते ।

जम्बूद्वीपप्रज्ञप्तेर्मूलपाठे व्यवहृतान् शब्दान् यथेच्छं परिवर्त्य तथा वर्तमानविज्ञानवादिनां घोषणाभिर्भीत्वा केचन अपरिकर्मितमतयो विद्वांसः पृथ्वीं गोलाकारां साधयितुं यतन्ते तन्न रुचिरम् । तत्रत्यो मूलपाठस्त्वेवम्—

“ किमायार–भावपडोयारो णं भंते ? जंबुदीवे दीवे पण्णत्ते ?

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

गोयमा ! अयं णं जंबुदीवे दीवे सव्वदीवसमुद्दाणं सव्वब्भंतराए सव्वखुड्डाए वट्टे, तेल्लापूयसंठाणसंठिए वट्टे, रहचक्कवालसंठाण-संठिए वट्टे, पुक्खरकण्णियासंठाणसंठिए वट्टे, पडिपुण्णचंदसंठाण-संठिए वट्टे।"

पाठेऽस्मिन्नागतस्य वृत्तशब्दस्य चत्वारः पर्याया अभिधानचिन्तामणिकोशे सन्ति, तेष्वेकस्याप्यर्थः 'कन्दुकवद् गोल' इति न भवति। अन्ये शब्दास्तु स्पष्टा एव।

## आधुनिकी वैज्ञानिकी दृष्टिः

साम्प्रतिकवैज्ञानिकानां दृष्ट्या पृथिव्या अनेकेषामाकाराणां कल्पना विहिता सन्ति। तासामाधारेण केचन नारंगफलवद् गोलाकारां, परेऽलाबुफलवद् लम्ब-गोलाकारां परिचाययन्ति। सर जेम्स-जीनमहोदयस्य शब्देषु तु "इयं पृथिवी वस्त्रक्षालक-घनीकृत चिक्कणद्रव (साबुन) स्य बुद्बुद्वद् वर्तते, यस्याश्च तले वैषम्यमारोहा-वरोहौ च स्तः।"

( + 'मिस्टीरियन यूनिवर्स' पृ० १३९ )

एवंविधानामनेकेषामाकाराणां परिकल्पनासु सतीष्वपि एकान्ततो गोलाकारां मन्यमानामेतां पृथिवीं गोलाकारां साधयितुं प्रदीयमानास्तर्का अपि सर्वांशेन सत्या नावतरन्ति। उदाहरणाय—यानस्य दृष्टान्तः क्षितिजस्य दृष्टान्तादयो येऽपि सन्ति तेषां मिथ्यात्वं मुनिराजैः श्रीमद्भिः अभयसागरगणिभिः (ये हि भू-भ्रमण-शोध-संस्थानस्य संस्थापकाः सन्ति, तथा प्राचीना-र्वाचीनभूगोलस्य च मर्मज्ञा विद्वांसः सन्तिः, तैः) साधितमस्ति।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

विशिष्य चात्रेदमेवास्ति ज्ञापनीयं यदस्माकं भारतीयेषु प्रायः सर्वेष्वपि शास्त्रेष्वेतद्विषये समानमैकमत्यमस्ति, किञ्च वैदेशिकाः केचन विचारका अपि विज्ञानवादप्रचारितस्य पृथिव्या गोलाकारस्य विरोधं कुर्वन्तीति ।

## आगमेषु पृथिव्याः स्थिरत्वम्

पृथिवीत एव सम्बद्ध एकोऽन्यो बहुचर्चितः प्रश्नो विद्यते, तस्याः गतेः । वर्तमानं विज्ञानमेकान्ततः पृथिवीं भ्रमन्तीं घोषयति, सूर्यं च स्थिरं प्रतिपादयति । अस्माकमागमा निश्चितरुपेण पृथिवीं स्थिरां सूर्यञ्च भ्रमणशीलमभिव्यञ्जयन्ति।

अन्याऽन्येष्वागमेषु वर्णितानां विचाराणामतिरिक्तः 'सूर्य–प्रज्ञप्तौ' सूर्यस्य गतेः स्पष्ट उल्लेख एवमस्ति—

"तं जया णं ते सूरिए सव्वब्भंतराओ मंडलातो सव्वबाहिरं मंडलं उवसंकमित्ता चारं चरति, सव्वबाहिरातो मंडलातो सव्वब्भंतरं मंडलं उवसंकमित्ता चारंचरति, एस णं अद्धा केवइअं रातिदियग्गेण आहितेति वदेज्जा ।

ता तिण्णि छावट्ठे रातिंदियसए रातिंदियग्गेणं आहितेति वदेज्जा !"

(श्रीसूर्यप्रज्ञप्तिसूत्रम्—१ प्राभृते ९ सूत्रं)

अत्र गणधरो गौतमो भगवन्तं महावीरं पृच्छति यत्—

"हे भदन्त ! सूर्यो यदा सर्वाभ्यन्तरमण्डलात् सर्वतो बहिर्मण्डले गच्छति, तथैव च सर्वतोऽभ्यन्तरमण्डलमागच्छति तदाऽस्य सूर्यस्येयत्यां गतौ कियन्त्यहोरात्राणि व्यतियन्ति ?

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

भगवता महावीरेण चोत्तरितं यद्—हे गौतम ! अस्यां गति-
यायां षट्षष्ट्युत्तर–त्रिशतमितान्यहोरात्राणि व्यतियन्तीति ।

एवमेवास्य विषयस्य विशिष्टायै पुष्ट्यै पुनः प्रश्न उपस्थापितो यत्

"ता एताए अद्धाए सूरिए कति मंडलाइं चरंति ? कति मंडल
दुखुत्तो चरइ ? कति मंडलाइं एगखुत्तो चरति ?

ता चुलसीयं मंडलसतं चरति बासीतितं मंडलसतं दुखु
चरति, तं जहा णिक्खममाणे चेव पवेसमाणे चेव दुवे य खलु मंडल
सइं चरइ, तंजहा–

सव्वब्भंतरं चेव मंडलं सव्वबाहिरं चेव मंडलं । इति

(तत्रैव–सूत्रम् १८

एतदनुसारं गणधरगौतमेन पुनर्भगवन्तः पृष्टाः, "हे भदन्त
समयेऽस्मिन् (षट्षष्ट्युत्तर–त्रिशताहोरात्रेषु) सूर्यः कति–मण्डले
भ्रमति ? द्विवारं कतिमण्डलेषु भ्रमत्येकवारं च कति–मण्डलेष्विति ।
तदुत्तरे च भगवतोक्तम्–

"हे गौतम ! सामान्यतः सूर्यो १८४ मण्डलेषु भ्रमति, तेषु च
१८२ मण्डलेषु द्विवारं भ्रमति । यथा - निष्क्रमणकाले तथा प्रवेशसमये
च । शिष्टयोर्मण्डलयोश्चैकवारं भ्रमति, सर्वतोऽन्तर्गतं मण्डलं सर्वतो
बहिर्गतं मण्डलञ्च ।"

श्रीभगवतीसूत्रवृत्तेः पञ्चमे शतके प्रथमोद्देशेऽपि सूर्यस्य गतिमेव
कालविभाजनस्य कारणं द्योतयद्भिः पूर्वसूरिभिः प्रोक्तम्–

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

जह जह समये पुरओ, संचरइ भक्खरो गयणे।

तह तह इओ वि णियमा, जायइ रयणीइ भावत्थो ॥

एवं च सइ णराणं, उदयत्थमणाणि होंति णियमाइं।

सइ देस-कालभेए, कस्सवि किंचिवि दिस्सए णियमा ॥

अर्थात्–यथा यथा समये सूर्यः पूर्वां प्रति पुरो वर्धते, तथैव पृष्टवर्तिदेशेषु रात्रिर्भवति। एतदनुसारं देश–क्षेत्रयोर्भेदेनोदयाऽस्तयोर्भेदो भवति, तथा तत्कारणादेव कालभेदो भवतीति।

'श्रीमण्डलप्रकरणटीका'यामीदृश्याः सूर्यगतेरस्मादपि सूक्ष्मतया विश्लेषणपूर्वकं सोदाहरणं विवेचनं कृतमस्ति।

एवं च विश्वस्य समस्ता अपि धर्मग्रन्था सूर्यस्य गतिं पृथिव्याश्च स्थिरतामेव स्वीकुर्वन्ति।

अतो विषयमेनं विभिन्नैः प्रमाणैः पल्लवितमकृत्वा सूचीकटाहन्यायेन काश्चन पङ्क्तयोऽत्र प्रस्ताविताः सन्ति।

## मनोमन्थनस्यावश्यकता

उपर्युक्तानां विचाराणामुपस्थापनस्यायमाशयोऽस्ति यदद्य धर्मं धर्मशास्त्राणि च प्रति समाजस्यास्था एवमेव शिथिलप्राया दृश्यन्ते। धार्मिकीषु भावनासु भूयांसः कृत्रिमा दोषा आरोप्यन्ते। वयमुपेक्षा-बुद्ध्या सहमाना आरोपयितॄन् नास्तिकादिवाग्भिः सन्दूष्य मौनं भजामः।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

अनया च रीत्या सत्यस्य गवेषणां प्रति जायमानोऽनुत्साहः कर्तव्याद् दूरीकरोति ।

किञ्च यत्सत्यमस्ति तदपि चाकचक्येन समाच्छादितं भवति । प्राचीनानां महर्षीणां वचनेष्वारोप्यमाणोऽयमविश्वासः सत्यमेवास्मान् परीष्टये प्रेरयन् नितान्तमनुरुणद्धि भ्रान्तानां धारणानां निरसनायेति ।

एतद्विषये गूर्जरप्रान्तस्थ–भू-भ्रमण-शोधसंस्थानाचार्या उपाध्याय श्रीधर्मसागरमहाराजानां चरणोपासकाः श्रीमदभयसागरगणिवर्याः कटिबद्धाः सन्तः सन्ततं गवेषणारताः सन्ति । तैश्च संस्कृत–हिन्दी –गुजराती–आंग्लभाषासु नैकाः पुस्तिका रचिताः प्रकाशिताश्च । तासामध्ययनेन सत्या–सत्यपरीक्षणाय प्रार्थयमाना इहैव पल्लवितेन विरमामः ।

स....म्य....क्  म....न....नी....यं....

* विचाराणामुत्पत्तिः मनोमय–
भूमिकातः सत्वात् विचारैः
तर्कणाजालैर्वा सत्यं दुरधिगम्यं,
सत्यस्य मनोमय–
भूमिकातीतानुभव–
गोचरत्वादिति ॥

P. P. Ac. Gunratansuriji M.S.  Jin Gun Aaradhak Trust

भारतीयज्योतिषाधारेण

# पृथिव्या आकार-गति-मीमांसा



लेखक—

डॉ. रुद्रदेवः त्रिपाठी
M. A., Ph. D.

५

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

## 卐 निबन्धान्तर्गत-विषयाः 卐


| | पृ० |
|---|---|
| * उपक्रमः | ७५ |
| * पृथिव्या आकारः | ७६ |
| * भास्कराचार्याणां मतम् | ७७ |
| * यदि पृथ्वी गोलाकारा भवेत्, तदा– अनुपपत्ति-चतुष्कम् | ७९ |
| * पृथ्व्याः गतिमत्त्वे पक्ष–विपक्षमतानि | ८१ |


"सद्गुरुपासनापरिकर्मितजिज्ञासा—
विरला दुरधिगम्या च"

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

उपक्रमः

वेदाङ्ग–ज्योतिषे भूगोलवर्णनं सामान्यतः सर्वप्रथमं श्रीपतिविरचिते 'सिद्धान्तशेखर' नामकग्रन्थे विस्तृतमासीत्, परं तस्य ग्रन्थस्य यस्मिन् भागे तद् वर्णनमभूत्, स भागः साम्प्रतं दुष्प्रापोऽमुद्रितश्च विद्यते, अतः केवलं यत्र–तत्रागतैः प्रकीर्णवचनैरेव तदनुमानं विदुषां प्रतीतिपथमवतरति ।

तदनन्तरं श्रीलल्लाचार्यविरचिते 'शिष्यधीवृद्धिद'ग्रन्थे श्री भास्कराचार्यविरचिते 'सिद्धान्तशिरोमणौ' च भूगोलवर्णनं समुपलभ्यते ।

सूर्यसिद्धान्तादीतरज्योतिषग्रन्थेषु न तथा वर्णितोऽस्ति विषयोऽयमिति कृत्वा विद्वांस एवमनुमिन्वन्ति विद्वांसो यद् ज्योतिषग्रन्थेष्वागतं भूगोलवर्णनं प्रायः पुराणेभ्य उपबृंहितं विद्यते ।

भास्कराचार्यस्य सिद्धान्तशिरोमणिग्रन्थश्च ब्राह्म–स्फुटसिद्धान्तानुसारी विद्यते । उक्तञ्च–भगणोपपत्त्यारम्भभाष्ये–"यथाऽत्र ग्रन्थे ब्रह्मगुप्तस्वीकृताऽऽगमोऽङ्गीकृत" इति ।

स च विष्णुधर्मोत्तर–पुराणान्तर्गतं ब्रह्मसिद्धान्तमनुवर्तत इति प्रसिद्धिः । अतः श्रीभास्कराचार्यविवृतं भूगोलवर्णनं पुराणानुरुपमिति परम्परासिद्धम् । पुराणेषु च भूगोलवर्णनं नास्ति व्यवस्थितम, परन्तु श्रीभास्कराचार्यैः स्वकीये सिद्धान्तशिरोमणेर्गोलाध्याये भुवनकोशेऽतीव रमणीयं काव्यमयं भूगोलवर्णनं निबद्धमस्ति, तदत्र विविच्यते ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

## पृथिव्या आकारः

पृथिव्या आकृतिविषये प्राचीनकालादेव विदुषां भिन्न-भिन्नानि मतानि विद्यते। तत्र हि केषाञ्चिन्मते भूरियं समतलाकारा, केषाञ्चन मते कूर्मपृष्ट[illegible]री, अन्येषां मते च कमलाकारा, परेषाञ्च साम्प्रतिकानां मते पृथ्वी क[illegible]काकारा वर्तते। तथापि प्राचीनग्रन्थेषु जैनानां धर्मग्रन्थेषु बौद्धग्रन्थेषु च समतलाकारैव पृथ्वी विशिष्य घोषिता दृश्यते। वायुपुराणे पद्मपुराणे, विष्णुधर्मोत्तरपुराणे, श्रीमद्भागवते च स्पष्टमेवोल्लिखितमस्ति यत्—"पृथ्वी समतलाकारा पुष्करपत्रसमाकारा वा विद्यत" इति। तदविकृत्यैव प्रायेण ज्योतिषग्रन्थकर्तृषु मुख्यः श्रीपतिरेवमुदीरयति—

"आदर्शोदर-सन्निभा भगवती विश्वम्भरा कीर्तिता,
कैश्चित् कैश्चन कूर्मपृष्ठसदृशा कैश्चित् सरोजाकृतिः।"

श्रीलल्लेन च शिष्यधीवृद्धिदगोलाध्यायस्य मिथ्याज्ञानाध्याये ३६ तमे पद्ये—

"समता यदि विद्यते भुवस्तरवस्तालनिभा बहूच्छ्रयाः,
लक्ष्मेव न दृष्टिगोचरं नुरहो यान्ति सुदूरसंस्थिताः॥"

इत्यादिना भुवः समतलाकारस्य खण्डनं विहितम्।

इतः परं ज्योतिषग्रन्थनिर्मातृभिर्विशिष्य सेयं चर्चा न विशदीकृता, न च भूमेर्गोलताप्रतिप्रतिपादकानां खण्डनमपि विहितम्।

वयन्तत्र यदि विचारयामस्तदा तत्रेदमनुमिनुमो यत् सर्वेषामेव

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

हृदि 'भूगोल' शब्दं प्रति काचन दृढाऽऽस्था गृहं कृतवतो। अत्र भूगोलशब्दे भूशब्दः केवलां भुवमेवादृत्य न प्रचलितः प्रतिभाति, परं सकलमपि ब्रह्माण्डमधिकृत्य प्रचलितं दृश्यते, अन्यथा समत्वखण्डनाय दीयमानेषु तर्केषु यथा—"सुदूरवर्तिनस्तरवस्तालनिभा मनुष्यैः कथं नावलोक्यन्ते? भूमेः समतलत्वे सुदूरस्थितमपि वस्तु दृश्यमेव, परं तन्न दृश्यते' अतो भूः समतलाकारा नास्तीति" विषये प्रायोगिकरूपेण

परीक्षणविधया च मनुजस्य नेत्रयोर्बहिर्गोलत्वाद् दृष्टेश्च ४५ अंशान् यावदेव व्यवस्थितावलोकनाय कोणनिर्मितिवशादनन्तरं च क्षितिजावलोकनवद् गोलाकारविलोकनप्रकृतिवशात्तत्र तत्र प्रतितर्का-श्चर्चास्पदं कथं न प्राप्तवन्तः? लक्ष्यस्यायं तर्कः साम्प्रतिक धूम्रयान (रेल) मार्गस्थलोहशलाकानामुत्तरोत्तरविलोकनेन सद्य एव धूलिसाद् भवति।

## भास्कराचार्याणां मतम्

श्रीभास्कराचार्या अपि लल्लमनुसृत्यैव दर्पणोदरसन्निभां धरित्रीं निषेधयन्तः स्वीयं तर्कमित्थमुपदीकुर्वन्ति—

> "यदि समा मुकुलोदरसन्निभा, भगवती धरणी तरणिः क्षितेः।
> उपरि दूरगतोऽपि परिभ्रमन् किमु नरैरमरैरिव नेक्ष्यते?॥"
> ( सि. शि. गो. अ. ११, मु. को. )

अस्यायमाशयो यत् पृथ्वी यदि दर्पणोदरवत् समतला वर्तते,

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

तदा भूमेरूपरि दूरे भ्रममाणः सूर्यो मनुष्यैर्देवताभिरिव कथं सदा नालोक्यते ? इति । परमस्य तर्कस्य खण्डनं तु सुमेरोर्मध्यवर्तित्वात् सूर्यस्य च परिभ्रमणशीलत्वात् स्पष्टमेवास्ति । यदा सूर्यः परिभ्रमन् स्वीयायां कक्षायां पुरो वर्धते, तदा यस्मिन् भागे मेरोरवरोध आयाति, तस्मिन् भागे भुवि स्थिता मानवा सूर्यं न परीयन्ति, अमरास्तु विहायसि स्थित्वाऽवस्थितं सूर्यं सर्वतो भ्रमन्तमपि विलोकन्त एवेति नात्र संशयः ।

भारतीय–गणकानामयं भ्रमः परस्तात् तु सर्वसम्मतरुपमेवा-धारयदिति प्रतीयते । तथाऽपि पृथ्वी समतलाकारतावती कथं दृश्यते ? इत्ययं प्रश्नस्तेषां चेतसि भूयो भूय उदतिष्ठदेव । सूर्यसिद्धान्तेऽस्य प्रश्नस्य समाधानाय पृथिव्याः पृथुत्वं मानव दृष्टेश्च परिमितत्वमेवमुद्-घोषितम्—

"अल्पकायतया लोकाः, स्वस्थानाद् सर्वतोमुखम् ।
पश्यन्ति वृत्तामप्येतां, चक्राकारां वसुन्धराम् ॥"

(भूगोलाध्याये १४)

सिद्धान्तशिरोमणौ च—

समो यतः स्याद् परिधेः शतांशपृथ्वी च पृथ्वी नितरां तनीयान् ।
नरश्च तत्पृष्ठगतस्य कृत्स्ना समेव तस्य प्रतिभात्यतः सा ॥

(भुवनकोशे १३)

इत्युक्तमस्ति । तत्प्रमाणतायै च दूरादागम्यमानस्य पोतस्य प्रथमं शिखरावलोकनं समुद्रतटस्थो नरः करोतीति कारणं स्थापयन्ति, परं

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

हन्त ! प्रमाणस्यास्य प्रामाणिकत्वं तेषां पूर्वोक्तदृष्टिदोषकारणादेव खण्डितं भवति । एवं विषयमवलम्ब्य भू—भ्रमण—शोध—संस्थानसंस्थापक—श्रीमदभयसागर गणिवर्यैः स्वयं समुद्रतटमाश्रित्य कतिपयैर्वैज्ञानिकैः सह कारितं दूरवीक्षणयन्त्रसाहाय्येन च विलोकनं कृतं, तदा सर्वथा मिथ्यैव प्रतीतम् । यदा च चित्रग्राहकयन्त्रात् चित्रं गृहीतं तदापि पूर्णमेव चित्रमायातम्, अतो मानवदृष्टेर्दोषादतिरिक्तं किमपि कारणं न तत्र प्रत्यभात् ।

सिद्धान्तशिरोमणेर्भुवनकोशेऽमुमेवार्थमाश्रित्य गणितयुक्त्याऽपि भूमेर्गोलाकारता प्रतिपादिता। यथा—

"निरक्षदेशे क्षितिमण्डलोपगौ ध्रुवौ नरः पश्यति दक्षिणोत्तरौ ।
तदाश्रितं खे जलयन्त्रवत् तथा, भ्रमद् भचक्रं निजमस्तकोपरि ।"

"उदग्दिशं याति यथा यथा नरस्तथा तथा स्यान्नतमृक्षमण्डलम् ।
उदग्ध्रुवं पश्यति चोन्नतं क्षितेस्तदन्तरे योजनजाः पलांशकाः ।।"

एवं भुवो गोलत्वप्रतिपादनं यत्कृतं दृश्यते, तस्यापि खण्डनं प्रथमं तु भुवो ऽण्डाकारं मानयतां विचारादपि भवति ।

किञ्च—

(१) यदि पृथ्वी गोलाकारा भवेत्, तदा—

प्रत्येकं साम्प्रतिको वैज्ञानिक एनां वार्तां स्वीकरोति यच्चन्द्र-

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

मसस्तथाऽन्येषां ग्रहाणामेक मुखं सदैव पृथिव्यां अभिमुखं तिष्ठत यदि ते ग्रहाः कन्दुकाकारा अभविष्यन् तथा स्वासु धुरासु अभ्रमिष्यन् तदा निश्चयेनैव प्रत्येकं दिवसे, प्रत्येकं मासि, प्रत्येकं वर्षे वा तेषां भिन्न—भिन्नानि धरातलानि पृथिव्या अभिमुखान्यभविष्यन्। एतेन सिद्ध्यति यदन्ये ग्रहाः स्थालीव सन्ति। येषां तटानि केन्द्रापेक्षया मनागुच्चतां श्रितानि सन्ति। यदि च भूरपि ग्रहरुपा विद्यते तदा साऽप्यन्य-ग्रहाणामिवावतरोच्चतावत्यस्येव।

(२) यदि पृथ्वी गोलाकारा भवेत्, तदा—

सनातनानां हिमश्रेणीनामौन्नत्यं भूमध्यरेखातो दक्षिणस्यामपि तावदेवाभविष्यद् यथोत्तरस्यामस्ति। दक्षिणामेरिकायां सनातनहिमश्रे-णीनामौन्नत्यं १६००० फुटमितमस्ति, किञ्च यथा यथा वयमुत्तरां दिशं प्रति वर्धामहे, तथा तथा सेयमुच्चता क्रमशो ह्रसीयसी भवति; अला-स्कायां गमनात्परं तु सा केवलं २००० फुटमितैव तिष्ठति। अधिक-मुत्तरां दिशं प्रति गते सति तु सोच्चता समुद्रतलात् केवलं ४०० फुट मिता परीक्षिताऽस्ति।

(३) यदि पृथ्वी गोलाकारा भवेत्, तदा—

उत्तरीयध्रुवस्य निकटे यादृश्यो वनस्पतय उत्पद्यन्ते, तादृश्य एव दक्षिणीयध्रुवेऽपि समुदपत्स्यन्त। उत्तरीयध्रुवस्य परितोऽनेक-विधाः वनस्पतयः प्राप्यन्ते दक्षिणीयध्रुवे च ७० अक्षांशेषु एकोऽपि जीवो न दृश्यते।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

(४) यदि पृथ्वी गोलाकारा भवेत् तदा—

उत्तरस्यां दिशि यस्मिन्नक्षांशे यावन्तं समयं यावदुषः-कालस्तिष्ठति, तावत्येवाक्षांशे दक्षिणस्यां दिशि तावन्तं कालं यावदुषः कालोऽस्थास्यत्, किन्तु वस्तुतस्तथा नास्ति, उत्तरस्यां दिशि ४० अक्षांशेषु ६० मिनिटे यावदुषःकालस्तिष्ठति, तदैव वर्षस्य तस्मिन्नेव समये भूमध्यरेखायां १५ मिनिटं यावद् दक्षिणस्यां दिशि च ४० अक्षांशेषु तु केवलं ५ मिनिटं यावदेव तिष्ठति।

एवमेवानेकविधं गणितादिप्रक्रियाभिः परीक्षणाद् ज्ञायते यद् ज्योतिर्विदामस्मिन् विषये विचारः केवलं पारम्परिकतामेवाऽश्रयत्, तैरत्र विषये परीक्षणादिभिः किमपि न कृतं तदधुना नवीनदृग्गणितविद्-भिरस्मिन् विषयेऽपि विचारणीयमस्तीति विषयस्योपस्थापनस्याशयः।

## पृथ्व्याः गतिमत्त्वे पक्ष–विपक्ष–मतानि।

यथा भूमेराकारविषयिणी निष्ठा ज्योतिर्वित्सु प्रावर्तत, तथैव भूमेर्गतिविषयेऽपि मतामते प्राचलताम्। यथाहि—

"यथोष्णतार्कानलयोश्च शीतता, विधौ द्युतिः के कठिनत्वमश्मनि।
मरुच्चलो भूरचला स्वभावतो, यतो विचित्रा बत वस्तुशक्तयः॥"

(गोलाध्याये भुवनकोशे)

अयमाशयः—सूर्येऽग्नौ च उष्णता, चन्द्रमसि शीतता, जले

तरलता, अश्मनि कठिनता, वायौ चञ्चलता, भूमौ स्थिरता च स्वभावतो वर्तते। प्रत्येकं वस्तुनि तत्तद्धर्मः स्वभावतो भवतीयमेव वस्तुशक्तिः।

परं भुवोऽचलत्वमस्तीत्येवं स्वीकुर्वन्तोऽपि केचनाचलाशब्दमेवं आचक्षते यदस्ति शब्दस्यार्थद्वयम्—इयं भूराकाशे निराधारा स्वशक्त्या तिष्ठति इति प्रथमोऽर्थः, द्वितीयश्च इयं सूर्यादिग्रहवन्न भ्रमतीति।

भारतीयज्योतिषाचार्येषु प्राक्तनेन श्रीमदार्यभट्टेन भुवश्चलत्वमङ्गीकृतम्। उवाच—

"अनुलोमगतिर्नौस्थः पश्यत्यचलं विलोमगं यद्वत्।
तद्वत् स्थिराणि भानि समपश्चिमगानि लङ्कायाम्॥"

परमेवम्भूतकल्पनायां किमपि कारणं ग्रन्थकारेण नोपदिष्टम्। श्रीवराहमिहिराचार्येण बृहत्संहितायां संहिताविषयसूचीगणनाप्रसंगे 'क्षितिचलन' मिति निर्दिष्टम्। तेन भुवो भ्रमणमाचार्याभिमतमुत किञ्चिदन्यत्, एतत् स्पष्टं नोक्तम्। श्रीभट्टोत्पलेन टीकायामस्यार्थो भूकम्प इति कृतः, भवतु। परं ज्योतिषशास्त्रेऽवश्यमेव भुवो गतिमत्त्वं स्वीकृतमभूदेव, तस्मादेव परवर्तिभिराचार्यैरस्य भूभ्रमणखण्डनं कृतम्। तद्यथा—

"यदि च भ्रमति क्षमा तदा स्वकुलायं कथमाप्नुयुः खगाः।
इषवोऽभिनभः समुज्झिता निपतन्तः स्युरपां पतेर्दिशि॥४२॥"

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

"भूपूर्वाभिमुखे भ्रमे भुवो वरुणाशाभिमुखो व्रजेद् घनः ।
अथ मन्दगमात्तदा भवेत् कथमेकेन दिवा परिभ्रमः ॥४३॥"

(शि. धी. वृ. मिथ्याज्ञानाध्याय)

आधुनिकैर्वैज्ञानिकैश्चापि भुवो गतिमत्त्वमेव गणितद्वारा प्रतिपादितमस्ति । तेषां मन्तव्यमस्ति यत्–सूर्यं परितो ग्रहाणां भ्रमणेन बुध–शुक्रयोर्वक्रमार्गादिदर्शनं क्षेत्ररीत्या सम्यग् भवति । सूर्यः स्थिरः । सूर्यं परितो भूग्रहा भ्रमन्तीति स्पष्टम् । अथवा ग्रहाणां प्रदक्षिणाकालवर्गे मन्दकर्णघनेन भक्ते सर्वत्र निष्पत्तिस्तुल्यैव १३३४ स्वल्पान्तरतो लभ्यते । अतः सूर्यं परितो भूग्रहा भ्रमन्ति । सूर्यं परितोऽक्षोपरि भुवो भ्रमणेनाक्षासन्नस्थाने किञ्चित् समतलत्वं जायते । अतो भूपिण्डोऽण्डाकारः पाश्चात्यानां मते । परमेतद्विषयेऽपि बह्व्य आपत्तयः सन्ति ।

सुबहूनि कारणानि शङ्कारूपाण्युपतिष्ठन्ते, येषां निवारणायोत्तराणि न मिलन्ति । एवं ज्योतिर्विदां विचार–परम्पराः साम्प्रतं पुनःपरीक्षणं कामयन्ते, तदर्थं च विदुषामावाहनमस्ति—

पुराणमित्येव न साधु सर्वं, नवीनमित्येव न चाप्यवद्यम् ।
सन्तः परीक्ष्यान्यतरद् भजन्ते मूढः परप्रत्ययनेयबुद्धिः ॥

●

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

समीक्षया पठन्तु........

* नानास्वरूपनिकरयुतपदार्थानां तीव्रतमयाऽपि प्रज्ञया प्रकृष्टतमैश्च साधनैरवगमः मर्यादितस्वरूपावगमरूप एव स्यात् !

न हि समस्तदृष्टिकोणाधीनसम्पूर्ण–स्वरूपाधिगतिः सीमितैः इन्द्रिय–मनः–बुद्धिपरिकर्मणाधीनैः तत्तद्विशिष्टतमैरपि साधनैः स्वरूपलाभं प्राप्तुं शक्या।

अतः तत्त्वजिज्ञासा–निश्रो जीवित्व–स्वाज्ञता –प्रतिश्रुति–ज्ञानार्जनसाधनमर्यादादीनां हार्दिकस्वीकारेण सत्रा सद्गुरूणां शरणं विनीतभाव–नम्रता–सरलतादिगुणगणोपबृंहितं स्वीकर्तव्यं धीधनैः मुमुक्षुभिः ॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

# एपोलोयानस्य
# चन्द्रयात्रा-मीमांसा

लेखक :
डॉ. रुद्रदेवः त्रिपाठी,
M.A., Ph.D.

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

## 卐 निबन्धगत—विषयाः 卐

* चन्द्रचिन्तनस्यावश्यकता ८७

* चन्द्रमस उत्पत्तिः ८८

* पाश्चात्त्यानां मतम् ८९

* भारतीयं मतम् ८९

* चन्द्रनाम्नां विमर्शः ९०

* चन्द्रधरातले यानस्यावतरणमभिलक्ष्य विभिन्नानि चिन्ततानि ९२

* द्वयोः प्रमुखमतयो-रूहापोहः ९३

* एपोलोयानस्य चन्द्रलोकेऽनव-तरणप्रतिपादकम् प्रतितर्कनवकम् ९६

* चंद्रलोकतः प्राप्ताणां चित्राणां विचारः १०१

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

## चन्द्रचिन्तनस्यावश्यकता

भारतस्यास्तिक-परम्परायाः प्रतीकभूतश्चन्द्रो बहुभ्यो युगेभ्योऽस्माकं निष्ठाया आस्थायाश्चालोको विद्यते। आह्लादकतायाः शीतलतायाश्च कारणाच्चन्द्रश्चिरादमृतवर्षी मन्यते, तथा दिव्यलोकस्य विशिष्टासु विभूतिषु वन्दनीय एकाऽनुपमो देवः सन् स आराधनाया मानबिन्दुरिष्टफलप्रदाता कल्पतरूपमश्च सम्मान्यते।

प्राणिवर्गः सकलोऽपि चन्द्रं प्रति कृतज्ञः। प्रत्येकं धर्मः सम्प्रदायो वा चन्द्रं प्रति तदीयया चिरन्तन्या शक्त्याऽभिभूतो नतमस्तकः सन् तदीयान् गुणान् गायति। तदीयोत्पत्ति—स्थिति—गति—कृत्यादीनपि वयं तत्स्तुतिमाध्यमेन ज्ञातुं शक्नुमः। सः प्रशान्ते निशीथे स्वकीयैः कमनीयैः किरणैः क्षुपान् पादपान् लताश्च संस्पृश्य परिषिञ्चति, तस्मात् स 'ओषधीश' इति गद्यते। तस्मिन्निलीनं लाञ्छनं तं 'शशलाञ्छन' नाम्नाऽवबोधयति। स्वीयानां कलानां सङ्कोच—विकोचाभ्यां स 'क्षयी' 'पूर्ण'श्चापि मन्यते। समुद्रेषु जलवेलावृद्धिरपि तत्कलापूर्तिमधिकृत्यैव भवति, ततः स 'समुद्र—सूनु'—रपि कथ्यते।

श्रद्धा—विश्वासयोर्भुजाभ्यामाबद्धोऽयं संसारो धर्मस्य शास्त्राणाञ्चाश्रयेण यत्किञ्चिदपि मनुते तस्मिन् विसंवादो भवितुमर्हति, परं विवादस्य नावसरः। परमद्य विज्ञानस्य कथितैः प्रहरिभिश्चन्द्रधरातलेऽवतीर्य "ततः पृथ्व्या इव सम्प्राप्ताद् धराभागाद् मृत्खण्डाः प्रस्तरखण्डाश्चानीता" इति घोषणारूपेण विचारशालिनां कृते चिन्तनस्य

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

नवीनो मार्गं उद्घाटितः। अतोऽत्र तद्विषये भारतीय–वेद–वेदाङ्ग–पुराण–ज्योतिषादिशास्त्राणामाधारेण चन्द्रविषयिण :रणां पुरस्कृत्य बर्तमानकालिकमनीषिणां चन्द्रसम्बन्धि–विचारान् प्रस्तोष्यामः।

## चन्द्रमस उत्पत्तिः

**प्रथमः पक्षः** वेदेषु 'चन्द्रमा मनसो जातः (ऋग्वेदः १०।९।१०) इति कथयित्वा चन्द्रमाः प्रजापतेर्मनस उत्पन्न इति प्रतिपादितम्। अस्यैव कथनस्य पुष्टिरुत्तरकालिकेषु समस्तेष्वपि शास्त्रेषु मिलति। यथा जैमिनियोपनिषदि–अथ यन्मन आसीत् स चन्द्रमा अभवत् (२।२।२।) तथा महाभारतस्य शान्तिपर्वणः ३६४-तमेऽध्याये नर–नारदाभ्यां नारदायेयमेवंवातैवं कथिताऽऽस्ते—

तस्माच्चोत्तिष्ठते देवात्, सर्वभूतगतं मनः।
चन्द्रमा येन संयुक्तः, प्रकाशगुणधारणः ॥११॥

**द्वितीयः पक्षः**— अयं पक्षो ह्यादित्याच्चन्द्रमसः उत्पत्तिं समर्थयति, वर्णनश्चास्य शतपथब्राह्मणे यज्ञस्य चयनप्रकरणे माध्यन्दिनमुनेः प्रवचन इत्थं कृतमस्ति।

"सोऽकामयत। भूय एव स्यात्। प्रजायेतेति। स आदित्येन दिवं मिथुनं समभवत्। तत आण्डं समवर्तत। एष वै रेतः। तदभ्यमृशत्। रेतो निगृह्णीति। ततश्चन्द्रमा असृज्यत। (६।१।२१४)"

इदमेव सत्यं पुराणेषु ब्राह्मणग्रन्थेभ्य आगतम्। यथा वायुपुराणे 'ऋक्षाश्चन्द्रग्रहाः सर्वे विज्ञेयाः सूर्यसम्भवा (५०।९९ तथा ५३।२८)

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

तृतीयः पक्षः ब्रह्माण्डपुराणे कृत्तिकासु चन्द्रमा उत्पन्न इत्यपि सूचितम् । यथा– "शीतरश्मिः समुत्पन्नः कृत्तिकासु निशाकरः ॥" (२।२४) । परमत्र कृत्तिकानां कथनेन किमभीप्सितमिति न स्पष्टम् ।

## पाश्चात्यानां मतम्

चन्द्रोत्पत्तिमधिकृत्य पाश्चात्य–विदुषामिदं मतं निश्चितमिवारित यद्–चन्द्रस्योत्पत्तिः पृथ्व्याः सञ्जातेति ।' अस्मिन् विषये 'चार्ल्स डार्विन'-स्य जार्ज एच. डार्विनसंज्ञपुत्रस्य मतं जार्ज गेमो लिखति स्वीये 'बायोग्राफी आफ दि अर्थ' ग्रन्थे यद्– 'चन्द्रः पृथिव्या पृथग्भूत' इति । परं! अस्य मतस्य प्रख्यात्यनन्तरमेव द्वितीयमेकं मतं प्रसृतं यस्मिन् सूचितं यद्–' इदं मन्यते यच्चन्द्रमसो भारः पृथ्व्या अधिको विद्यते. परं चन्द्रस्य भारो बृहद्ग्रहाणां भारान्न्यूनः तथा भुवो भाराच्च अधिको विद्यतेऽत इदं मन्तव्यमधिकं सङ्गतं भविष्यति यत् पृथ्वी चन्द्रात् निःसृतेति । चन्द्रस्य स्वल्पो हि आकारोऽस्मिन् नास्ति बाधकः ।

एवं परस्परं विपरीतानां मतानां सतामपि वैज्ञानिकाः पृथिव्या एव चन्द्रस्योत्पत्तिं मन्वते ।

## भारतीयं मतम्

उत्तरकालिकैर्भारतीयमनीषिभिर्वेदादिशास्त्राणामाधारेण परस्ताद् निर्णीतमिदं यद्– 'चन्द्रोऽयं न पृथिव्या उत्पन्नो न च चन्द्रात् पृथिवी । अपि तु, निःसंशयं चन्द्रोऽप्पुञ्जोऽस्ति तथाऽपां गभीरतमस्था-



P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

नाग्निःसुतोऽस्ति ।' यथा हि– तैत्तिरीयब्राह्मणे– 'चन्द्रमा वा अपां पुष्पम् ' तथा ताण्ड्यब्राह्मणे १।३।८ स्थले ' अपां पुष्पमसि ' इत्यादिना चन्द्रस्योत्पत्तिरद्भ्य एव जातेति स्पष्टम् । वायुपुराणस्य—

"–महादेवोऽमृतात्मासौ ह्यम्मयश्चन्द्रमाः स्मृतः ॥" (२४–४)

तथा–"उदकाच्चन्द्रमाः स्मृतः।" (५०–४), ब्रह्माण्डपुराणस्य–"पठ्यते चाग्निरादित्य उदकं चन्द्रमाः स्मृतः "प्रभृतिनी वाक्यानि सूर्यसिद्धान्तस्य च "ग्रहर्क्षाण्यम्बुगोलकाः" सदृशानि वचनानि चन्द्रं जलादुत्पन्नं समर्थयन्ति, ऋग्वेदभाष्ये स्कन्दस्वामिनाऽपि– ' सुषुम्नो नाम सूर्यरश्मिश्चन्द्रमसं गतोऽम्मयत्वात् चन्द्रमण्डलस्थे 'त्यादिवचनैः स्वमतमुपस्थापितम् ।

परं पाश्चात्या विद्वांसो मतमिदं नाऽङ्गीकुर्वन्ति, स्पष्टमेवोद्घोषयन्ति च ' निश्चितमेव चन्द्रमा उदकरहित ' इति (जी. गेमो. बायोग्राफी आफ दि अर्थ, पृ. ५३) इति।

## चन्द्र–नाम्नां विमर्शः

अस्त्येकमेतदपि तथ्यं यद् यस्य कस्यापि नामपरम्परा–परीक्षणेनापि तस्य वास्तविकता–विषये ज्ञानं मिलतीति । यतो हि लोके नाम्नामाधारेण तत्तद्गुणानामाकलनं क्रियत एव। अनया दृष्ट्या 'हरिवंशपुराणे' चन्द्रस्य केषाञ्चिद् नाम्नामेकत्र सङ्कलनं मिलति, तेषु च नामसु चन्द्रसम्बन्धिनोऽनेके गुणा ध्वनिता भवन्ति । तथाहि—

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

श्वेतभानुर्हिमतनुर्ज्योतिषामधिपः शशी ।
अब्दकृत् कालयोगात्मा ईड्यो यज्ञरसोऽव्ययः ॥

ओषधीशः क्रियायोनिरम्भोनिधिरनुष्णभाक् ।
शीतांशुरमृताधारश्चपलः श्वेतवाहनः ॥ १४५ । ७-८ ॥

एतेषु नामसु 'ज्योतिषामधिप' इति कथनं विशिष्य महत्त्वपूर्णमस्ति, यतो हि सर्वत्राऽपरत्र सूर्य एव ज्योतिष्कानामधिपतिः प्रोक्तः । अस्य च समाधानं नीलकण्ठेन स्वटीकायां ददता कथितं यत्—'सूर्य एव ज्योतिष्कानामीश्वरः, परं चन्द्रः सूर्यस्याऽपीश्वरः । यथा पार्थिवः काष्ठौ वह्नेर्वर्धकस्तथा चान्द्रं जलं सर्वेषामाकाशीय—पदार्थानां ( येषामिन्धनमप्–जलं वर्तते ) वर्धकमस्ति । अयमाशयो यत् सूर्यस्य तेजसो वृद्धये चन्द्रजलमेवापेक्षितमस्ति । तत्रैव तैत्तिरीयोपनिषद् इदं वाक्यमपि—"चान्द्रमसा वाव सर्वाणि ज्योतींषि महीयन्ते १-२" उपर्युक्तस्य भारतीयमतस्य पुष्टिं विधत्ते । एवमन्यत्रापि नैकानि वचनानि सन्ति, यानि चन्द्रस्य स्वरूपं सूचयन्ति, परं तानि सर्वाण्यपि चन्द्रधरातलं स्पृष्टवतां मानवानां कथनेन तत आनीतमृत्तिकाशिलाखण्डादिभिश्चाऽसत्यमिव प्रतिभाति। अतोऽप्यस्मिन् विषये विशिष्य विमर्शः आवश्यकः । भारतीयाः प्राच्यविद्याविदोऽस्मिन् विषये स्वान् स्वान् विचारान् प्रकाशितवन्तस्तेऽप्यत्र मनाग् विचारणीयाः सन्ति ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

## चन्द्रधरातले मानवाऽवतरणमभिलक्ष्य विभिन्नानि चिन्तनानि

" चन्द्रधरातले सञ्चरणं विधाय ततो मृत्तिका–शिलाखण्डादीना–मानयनस्य सूचनया विश्वस्य मानवा विस्मये निपतिताः सन्तो मोद–मापन्ना" इति सत्यं ! किन्तु सहैवैकस्मा आवश्यकचिन्तनायापि बलात् प्रेरिताः । तदा प्रभृत्येवास्तिकसमाजे चतस्रो धारा जनिमलभन्त । ताश्चैताः—

१–एपोलोयानं चन्द्रेऽवतरितं तत्सत्यमस्तीति मत्वा तत आनीतं वस्तुजातं तदीयानि चित्राणि च सत्यानि सन्तीति साधयितुं केचन विद्वांस एवमजूघुषन् यदस्माकं शास्त्रेषु चन्द्रस्य मार्गविषये तत्रत्यवस्तुस्थितिविषये च यदुक्तं विद्यते तदद्य सत्यं सम्पन्नम् । एवं यथाकथञ्चित् साम्यं साधयतां तेषामयमभिप्रायोऽस्ति यदियं घटना नास्ति काचिन्नवीना । अस्माकं पूर्वजै–र्महर्षिभिरेवमेव पुराकालेऽपि चन्द्रयात्रा विहिताऽऽसीदिति ।

२–अपरे विद्वांस एवमाकलितवन्तो यदेषा चन्द्रयात्राऽवश्यं सम्पन्ना, परमेतया धार्मिकाणां चन्द्रस्य देवत्वविषयिण्या धारणाया न कापि हानिर्भवति । यतो हि भारतीया आस्तिका यथा स्वदेशस्य नदीः पर्वतान् तीर्थानि स्थानानि च स्वीयानि देवरुपाणि च मानयन्ति तत्र तत्र च लोकानां भारतीयेतरेषां गमनाऽऽगमनाभ्यामपि तेषां देवत्वं न नष्टं, तथैव चन्द्रेऽवतरणात् परमपि तस्य देवत्वविषयिण्यां श्रद्धायां न किमपि नैयून्यमायाति ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

३–एकतश्च वैज्ञानिकानामुद्घोषणमिदं श्रावं श्रावं शास्त्रश्रद्धा न नश्येदिति धिया कथयन्ति यदस्माकं शास्त्रेषु वर्णितस्य चन्द्रस्यै–पोलोयानलक्ष्यभूतेन चन्द्रेण सह सम्बन्धो नास्ति। यतो हि शास्त्राणां नैष विषयो यत्तानि खगोल–भूगोलानां चिन्तनानि कुर्युरिति।

४–एकश्चान्यन्मतमिदमप्यस्ति यद् विज्ञानवादिनो यत् स्थलं चन्द्रस्थलं मन्वते तत् नास्ति चान्द्रं धरातलम्, न च ते एपोलोयान-माध्यमेन यत्र गतास्तदस्ति चन्द्रलोकस्थलमिति। परं तेऽस्या एव भूमेः कस्मिँश्चिदपरिचिते भागेऽवतीर्णाः सन्तीति।

एतदतिरिक्तान्यामन्यान्यपि कानिचिन्मतानि श्रूयन्ते। विश्वस्य चाऽन्यांऽन्येषु भागेषु कास्का धारणाः प्रवर्त्तन्ते, तद्विषयेऽधुना न ज्ञायते।

## द्वयोः प्रमुखमतयोरूहापोहः

तत्र प्रथममतवादिनामिदं मतमस्ति यत् सत्यमेव चन्द्रे मानवा-वतरणं जातम्। अस्मिन् विषये केषाञ्चिदाचार्याणां लेखाः प्रकाशिताः कैश्चित् सम्पादकैश्च विचारा उपस्थापिताः। तेषु 'ज्योतिष्मती' पत्रिकायाः सम्पादकस्य विचारा इत्थं सन्ति–" अमेरिकादेशीया अन्तरिक्षयात्रिणश्चन्द्रस्य धरातले मानवस्य चरणस्पर्शाच्चन्द्रलोकः पुलकितोऽभूत्। एपोलो–११ संख्यकस्य निर्माणे २४ अर्बुदमुद्राणां व्ययः सञ्जातः। सहस्रत्रयादधिका वैज्ञानिकाः शिल्पिनश्चिकित्सका अभियान्त्रिकादयश्चाहर्निशं कार्यमकार्षुः। एकादशसंख्यकस्यैपो–लोयानस्य कार्यक्रमे पलस्यैकस्यापि नान्तरमभूत्। चन्द्रलोकेऽ-

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

वतरितानां मानवानां पथप्रदर्शनं भूतके निर्मितादन्तरिक्षगृहाद् भवति स्म। इदं न विस्मर्तव्यं यद् चन्द्रलोकस्य शासको भूतलवासी मानव एवाभूदिति। चन्द्रं गतो मानवो विश्वं प्रबलेनैकेनाणुविस्फोटकेन भस्मसात् करणे समर्थो भविष्यति? मानवस्य साधारणे जीवने किं परिवर्तनमागमिष्यति? किं जलप्लावानां, झञ्झावातानां, भूकम्पानाञ्च नियन्त्रणं कर्तुं शक्यति? मानवजीवनं भूयोऽप्यधिकं सुखि विधातुं कियदवधि प्रभुर्भविष्यति? इदं तु भविष्यद् दर्शयिष्यति। अथ यावत्तु इदमेव सिद्धमभूत्, यत् पुराणेषु लिखितेयं वार्ता 'रावणस्य पुत्रो नारायणः प्रतिदिनं प्रातश्चन्द्रलोके भ्रमणाय गच्छति स्म' सर्वथाऽसत्या कल्पनापूर्णा वा नास्तीत्यदि। "ज्योतिष्मती" (वर्ष. १३ अं. १)

एनमेवाधारमङ्गीकृत्य कैश्चन विद्वद्भिराधिभौतिका-धिदैविका-ध्यात्मिकदृष्ट्या चन्द्रस्य त्रिविधं रूपं स्पष्टयद्भिः स्वशास्त्राणां संरक्षणस्य प्रयासः कृतः।

द्वितीयं च मतमिदमस्ति यद्–एपोलोयानं चन्द्रं यावद् गतमेव नास्ति। अस्य च कथनस्य प्रामाणिकतायै चन्द्रलोकस्य, तं प्रति गमनमार्गस्य, तत्रत्यायाः स्थितेश्च शास्त्रीयदृष्ट्या विमर्शस्य तथा विज्ञानवादिभिः सूचितमार्गगत्यादीनामाधारेणैव तथ्यानामन्वेषणं प्रामुख्येन स्वीकृतमस्ति।

गतेभ्य एकोनविंशति वर्षेभ्यः 'पृथिव्या आकारस्य गतेश्च सम्बन्धिनि वैज्ञानिकदृष्टयाऽन्वेषणे संलग्नैः श्रीमतां पूज्योपाध्यायश्रीधर्म-

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

सागरमहाराजानां शिष्यरत्नैः श्रीमदभिरभयसागरगणिवर्यैर्यथासमय-मस्यां दिशि स्वीया विचाराः प्रकटीकृताः सन्ति' विचारगोष्ठ्यश्च कृतास्तथा प्राचीनाऽर्वाचीनविज्ञानाचार्यैः परामर्शो विहितः, फलतस्ते एतमेव निर्णयं सम्प्राप्ता यद्—'एपोलो-११ यानं चन्द्रधरातले न गतमिति ।

मुनिराज श्रीअभयसागरगणिवर्याणामियं निश्चिता धारणाऽस्ति यत्—'तत्त्वज्ञानं वस्तुनः सम्पूर्णं दर्शनं कारयति, तथा विज्ञानं वस्तुन आंशिकं स्वरूपं प्रायोगिककक्षातो दर्शनं कारयति ।' अस्मिन्नेवाधारे तैः सिंहगर्जना विहिताऽस्ति यत्—

"भौतिकवादस्य धरातले समुपस्थितेन विज्ञानेन यन्त्रविधाया नैपुण्याद् एपोलो-११ यानस्य काश्चन सिद्धयः प्रत्यक्षीभूतास्तत्र नास्ति विवादः परमेतावतैव ' विज्ञानेनातीन्द्रियपदार्था अपि विज्ञाता ' इति कथनं नोचितम् ।

एपोलोयानं पृथ्व्या सार्धद्विलक्षमितार्धकोशी ( २॥ लाखमाइल ) पर्यन्तं दूरे गत्वा कस्मिन्नप्यज्ञाते भूप्रदेशे एवावतरितं, तत् चन्द्रतल एवावतरितमिति मानने त्व न विधेया ।

यतो हि—विज्ञानं स्वयमेवैतत्सम्बन्धिनीः काश्चन शृङ्खलाः सन्धातुं सफलं नाभूत्, किञ्च कासाञ्चिदसम्भाव्यानां धारणानां कारणाद् विज्ञानस्य मूलभूता धारणा अपि दोलायिता अजायन्त ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

ईदृश्यां स्थितौ विज्ञानं स्वयं प्रयोगानां माध्यमेन पर्याप्तं परीक्षणं न कुर्यात्, तथाऽन्तिमं परिणामं न प्रकटयेत् तावद् मुद्रणालय–मस्त्रयोगद्वारेण सम्पादितेभ्यः प्रचार–प्रसारेभ्यःअपेक्षातोऽधिकं महत्त्वं प्रदाय समुत्पादितानां धारणानां जाले निपतनं नोचितम् ।"

**एपोलोयानस्य चन्द्रलोकेऽनवतरणप्रतिपादक–प्रतितर्कनवकं ।**

'एपोलो-११ यानं चन्द्रतले न गतम्' इति स्वस्य कथनस्य पुष्टये तैरेव मुनिराजैरधो दर्शिताःप्रतितर्काः समुपस्थापिताः सन्ति—

(१) वैज्ञानिकानां कथनमस्ति यद्–अपोलो यानं सेटर्न–५–राकेटस्य प्रक्षेपणेनोच्चैः १९०मीलं गत्वा पृथिव्या द्वे प्रदक्षिणे विधाय अन्तरिक्षानुसन्धानकेन्द्रे स्थितानां नियन्त्रकाणां यान्त्रिकनिर्देशनेन तस्य यानस्य चन्द्राभिमुखं तिर्यग्वलनवशात् पूर्वस्यां दिशि २,३०,००० माइलदूरे गतम् ।

अत्रेदं ज्ञातव्यं यत् पृथिवीत उच्चैस्तु तद्यानं १९० माइलमितमेव गतमासीत् । पृथ्वीतो दूरता २,३०,००० माइलमिताऽऽकलिता, किन्तु १९० माइलतोऽधिकमुच्चता तु नास्त्येव ।

अस्मादेव कारणाद् एपोलोयानस्य चन्द्रावतरणकाले नीचैरवतरणमावश्यकमभूत् ।

वस्तुतश्चन्द्र आकाशीयः पिण्डोऽस्ति, तथा ऽस्मात् जगतो ३१ लक्ष ६८ सहस्रमाइलमिते ऊर्ध्वक्षेत्रेऽस्ति । तत्र गमनाय सततमेपोलोयानस्योर्ध्वं गमनमावश्यकमभूत् ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

एतेनेदं स्पष्टं भवति यत् पृथिव्यास्तिर्यग्भाग एवैपोलोयानेन गमनं कृतमिति ।

(२) वयं यत्र वसामस्तद्विश्वं समस्तस्य विश्वस्यात्यन्तं लघीयान् भागो विद्यते। सकलविश्वस्य मध्यवर्तिनो जम्बूद्वीपस्य दक्षिणभागस्थ-भरतक्षेत्रस्य दक्षिणभागगतमध्यखण्डस्यात्यल्पखण्डे वर्तमानं पूर्णं ज्ञातविश्वमस्ति ।

भरतक्षेत्रस्यायामः पूर्व-पश्चिमयोः १०,८०,०००० माइलमित-स्तथोत्तर-दक्षिणयोः ८,५७,३६८ माइलमितोऽस्ति। मध्यखण्डस्य मध्य-केन्द्राद् दक्षिण-पश्चिमयोर्मध्यवर्तिनि नैऋत्यकोणे ३,७०,००० माइल-दूरे ८०००माइलमितव्यासशालिनि प्रदेशे वयं वसामः ।

इत एपोलायानं पूर्वस्यां दिशि गतमस्ति, तदा पूर्वस्यां दिशि ये बहवः पर्वताः सन्ति, तेष्वेव कस्मिन्नप्येकस्मिन् एपोलोयानस्यावतरणं सम्पन्नं भवेत् ? इत्थमनेन विमर्शेन स्पष्टं भवति ।

यदि वस्तुत एपोलोयानं पृथ्वीत उर्ध्वं गतं भवेत्, तदा प्रायः सार्धद्विलक्षमितदूरस्थितैरन्तरिक्षयात्रिभिः सह 'नासास्थितैर्वैज्ञानिकैः सम्पर्कः कथं रक्षितः ? एपोलोयानस्य यात्रिणो दूरदर्शनयन्त्रेण चित्राणि प्रेषयितुं कथं सक्षमा अभवन् ?

नासास्थितैर्वैज्ञानिकैर्वार्तालापो विहितः, दूरदर्शनयन्त्रे कार्यक्रमा आयाताः; इयं वार्तैव प्रमाणयति यदेपोलोयानं भुव ऊर्ध्वं १९० माइलमेवाऽर्थात् (आयनोस्फीयर) वातावरणस्य मर्यादां यावदेवागमत्

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

तथा तदनन्तरं पूर्वस्यां दिशि तिर्यग्भागे सार्धद्विलक्षमाइलं यावद्-गच्छदिति ।

यदि सर्वथा २॥लक्षमाइलमुच्चैरेव तयानं गतभमविष्यच्चेत् २०० माइलस्यायनोस्फीयरानन्तरं एक्झोस्फीयरे गतवता एपोलोयानेन सह कोस्मिकरेंज (प्रकाश–पंकितपटल) स्यावरोधानां कारणाद् वैज्ञानिका अन्तरिक्षयात्रिभिः सह सम्पर्कं साधयितुं क्षमा नाऽभविष्यन् ।

(३) वैज्ञानिकानां कथनानुसारं व्योमयात्रिणः पृथ्व्या ऊर्ध्वं २॥ लक्षमाइलमितं दूरे गतवन्तः, तत्र वातावरणं नास्ति चेद् ! राकेटस्य विस्फोटशब्दस्तत्र कथमभूत् ? चन्द्रस्य गुरुत्वाकर्षणे प्रविश्य भ्रमणकक्षायां स्थैर्याय तथा भ्रमणकक्षातो निस्सृत्य चन्द्रस्य गुरूत्वाकर्षणाद्विमुक्तये व्योमयात्रिभिर्विस्फोटस्तु विहित एवास्ति ।

तदा वेक्यूम (वायुशून्यता) मध्ये इन्धनं ज्वलितमेव कथम् ?

कदाचिद् वयमेवं मानयेम यत् ते यथा श्वासेभ्यो बाष्पस्य कूपिकां सह नीत्वा गतास्तथैव बाष्पस्य कूपिकायां प्रज्वलतो बाष्पस्य सहकारेण विस्फोटः सञ्जातः स्यात्, परं प्रज्वलितेन्धनस्यावशेषस्याथवा धूमस्य बहिर्निःसरणं कथमभूत् ?

वातावरणं विना इन्धनप्रज्वलनमथवा धूमो विना वातावरण-माध्यमं बहिर्निःसर्तुं शक्यत एव नैव ।

अस्मादप्येवं निगदितुं शक्यते यत् १९० माइलत ऊर्ध्वं ते न गताः, अपि तु तिर्यग्भागे २॥ लक्षमाइलमितं गता इति ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

(४) व्योमयात्रिभिरपोलोयानस्य गवाक्षेषु हिमस्य कुञ्झटिका-याश्च स्थितिविषये तत्कारणाच्च स्पष्टावलोकनाभावस्य च रावः नासास्थितानां वैज्ञानिकानां पुरतो विहितआसीत् ।

तत्र विचारणीयमिदमस्ति—वस्तुतो यदि ते २॥ लक्षमाइलमित-मूर्ध्वभागे गताः सन्ति, तदा तत्र शून्ये वातावरणे हिमं कुञ्झटिका च कुतः सम्भवेत् ?

कदाचित् तत् तत्र भवेदपि तदापि सूर्यस्य प्रचण्डेनातपेन शोषणं तेषां जातं भवेत् !

परं हिम-कुञ्झटिकयोवरणवशादेपोलोयानगवाक्षिकातः दर्शना-भावस्य रवणा व्योमयात्रिभिः कथं कथिता ?

(५) एपोलोयानं तिर्यग् गतमिति च केपकेनेडीतः प्रकाशिता-देपोलोयानगमन—दिशासूचकचित्रादपि स्पष्टं भवति ।

(६) एपोलोयानं यदि वस्तुतो वैज्ञानिकानां घोषणानुसारं चन्द्रतले गतं भवेत्, तदा वयमितः पूर्णिमायाश्चन्द्रं नवङ्ग्मितस्था-सिकेव पश्यामस्तदनुसारं चन्द्रे ते गता भवेयुस्तदा तत्र गमनानन्तरं पृथ्वी ३६ ईञ्च—३ फूटमितायामशालिनो स्थासिकेव दृष्टिपथमागता स्यात् ?

यतो हि पृथिव्या व्यासः प्रायः ७९२६ मीलमितस्तथा चन्द्रस्य व्यासः २१६० मीलमितोऽस्ति । अस्यायमाशयो यत् पृथ्वी—चन्द्रयो-

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

-र्मध्ये चतुर्गुणितमन्तरमस्ति । केपकेनेडीतः प्रमुखरूपेण प्रकाशितेषु चित्रेष्वेकमपि चित्रं तादृशं नास्ति यस्मिन् पृथिव्या व्यासो दीर्घः प्रदर्शितो भवेत् ।

सर्वेष्वपि वयं चन्द्रमितो यादृशं पश्यामस्तादृशमेव दृश्यं हि दरीदृश्यते । अत एतेन स्पष्टं भवति यत्—

"वस्तुतो यदि एपोलोयानं चन्द्रतलेऽवतरितं तदा यादृशं चन्द्रं वयमितः पश्यामस्तादृश्येव पृथ्वी ततः कस्माद् दृक्पथमागता ? चन्द्रापेक्षया चतुर्गुणिता दीर्घा पृथ्वी कस्मान्न दृक्पथमायाता ? तच्चित्रे कस्मान्नागतं दृश्यम् ? "

(७) एपोलोयानेन यत्रावतरणं कृतं तत्र सिकत–प्रस्तर–मृत्तिका–लघुप्रस्तरकणास्तथाऽऽर्द्रतादिस्थित्याऽपि स कश्चन पर्वतीयः प्रदेश एवास्तीति स्पष्टं भवति ।

(८) अमरीका–रशिया चेति द्वयमपि परस्पर प्रतिस्पर्धि, आकाशस्य क्षेत्रे रशिया वर्धमान आसीत्, साम्प्रतमप्यस्ति । परं ल्यूना पञ्चदशनामकं रशियादेशस्यान्तरिक्षयानमेपोलो–एकादशेन सहैव चन्द्रे गतं, तदा तयोर्मेलनं कस्मान्न जातं ? किञ्च परस्परमुभे अपि राष्ट्रेऽस्मिन् विषये मूके कथं स्थिते ? । अमरीकाराष्ट्रमपि रशियाप्रेषित ल्यूना १५ संज्ञ–चन्द्रशकटविषये मौन मासित् कुतः ?

(९) चन्द्रस्योत्पत्तेः चन्द्र–पृथ्व्योरन्तरस्य, चन्द्रे वातावरणस्याथवा जीवसृष्टेः सम्बन्धि धारणादीनां सम्बन्धि विज्ञानेनाथ यावन्निश्चित-

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

रुपेण किमपि स्पष्टं न कृतम् । कासाश्चित् कल्पनानामाश्रयेण विहिता एता व्योमयात्रा वस्तुतः सत्यस्य कियति निकटेऽवस्थन्त ? इति कथनं दुःशकमेवास्ति ।

## चन्द्रलोकत माप्त–चित्राणां विचारः

उपरि लिखिताद् चिन्तनादतिरिक्तं चन्द्रतलात् प्रेषितानां चित्राणां विषयेऽपि महान्तावूहापोहौ सम्पन्नौ । राजकोट (गुर्जरप्रदेश) स्य विदुषा श्रीप्रभुदास बेचरदास पारेखमहादयेनैकस्मिन् लेखे प्रकटितं यद्–"चन्द्रतलाद् गृहितानीमानि चित्राणि कल्पितानीवास्मान् प्रतीयन्ते । यतो हिं चित्रदर्शनेनैवं ज्ञायते यत्–चन्द्रमसोऽभिमुखं चित्राकर्षकयन्त्रं विद्यते, तथा तन्मध्ये भुवः क्षितिजं आयाति, तत्कारणादेव पृथ्व्या भागो विशालश्चन्द्रमसश्च लघायान् दृश्यते । अर्थात् पृथ्व्या एक भागतश्चित्रं गृहीतं–भवेत् तथा पृथ्व्या द्वितीये भागे चन्द्रो भवेत्, एवं प्रतीयते । तर्हि तत्र चित्रे चन्द्रस्य क्षितिजे पृथ्वी दृश्यतेऽथवा पृथ्व्याः क्षितिजे चन्द्रो दृश्यते ? अत्र विषये का वास्तविकताऽस्ति ?

चन्द्रस्य प्रदक्षिणाकर्तारश्चन्द्र–पृथ्व्योर्मध्ये आगच्छेयुस्तदेदृशं चित्रं कथमागन्तुं पार्यते ?

चन्द्रस्य परितो नैकट्यवशाद् चन्द्रस्य चित्रं विशालमागन्तुं शक्यते, तथा पृथ्व्या लघु चित्रमागन्तुं शक्यते । यदा चित्रेष्वेतेषु चन्द्रो लघुःदृश्यते पृथ्वी च विशाला । कथमेतत् सम्भाव्यते ?

चन्द्र–पृथ्व्योर्मध्ये स्थिरवाः कश्चन व्योमयात्री चित्रं गृह्णीयात्

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

तदा चित्राकर्षकयन्त्रे कस्यचनैकस्य चित्रमागन्तुं शक्नोति, परमुभयो-श्चित्रं नागन्तुं शक्नोति। चन्द्रस्यैकपार्श्वतश्चित्रे गृहीते सति चन्द्रस्य पृष्ठो भागः पूर्णरूपेणागन्तुं शक्यते, तथा भूमेश्चन्द्रमितो भागो नागच्छेत्। एवं तस्मिन् चित्रे भूमेश्चन्द्रस्य च सहैव पूर्णं चित्रं कदाप्यागन्तुं न शक्यते।

चन्द्रं परितो भ्रमन् जनो यदि चित्रं गृहणीयात् तदा चन्द्रस्य पूर्णं चित्रंमागन्तुं शक्यते, परं पृथिव्याश्चित्रं तस्मिन्नागन्तुं न शक्नोति। सतीष्वेतादृशीषु नैकासु विप्रतिपत्तिषु यदिदं चित्रं सपृथ्वीकं चन्द्रस्य गृहीतं विद्यते, तत् स्पष्टमेव तस्य काल्पनिकतां पुरस्करोति।

चन्द्रस्य समग्राऽप्याकृतिः कीदृश्यस्ति ? गोलाकारा स्थाल्याकारा वा ? यदि गोलाकाराऽस्ति तदोपरितने भागे निम्ने भागे च कीदृशी वर्तते ? किं फलस्यार्धभाग इवास्ति ? पृथ्वीमभितश्चन्द्रस्य कीदृशो भागोऽस्ति ? यदि वृत्ताकारवान् भागोऽस्ति तदा पूर्णो गोलभागः कथं दृश्यते ? चन्द्रस्य क्षितिजे पृथ्वी कथं द्रष्टुं शक्यते ? उभयोर्मध्ये लक्षशो माइलानामन्तरमस्ति, तच्चित्रे कस्मान्न दृश्यते ?

पृथ्वीं परिक्राम्यन् कश्चनैतादृशं चित्रं गृहणीयात्, तदेत्थं सम्भाव्यते, परं चन्द्रं परितः परिक्राम्यन् जनः कथमपि तादृशं चित्रं गृहितुं न समर्थो भवति। अभिमुखं चन्द्रो वर्तुलः कथमागन्तुं शक्नोति ?

एवमेव चन्द्रः पार्थिवः पदार्थः, स कदाचिद् दूरात् प्रकाशमयः

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

प्रतीयेत, परं निकटत ईदृशो गोलः प्रकाशरूपश्च कथं भवितुमर्हति ?

अत इदं चित्रं दूराद् गृहीतं प्रतिभाति। तथा तदनन्तरं तस्य बृहदाकारस्ता साधिता स्यात् तदैवैतत् सम्भाव्यते, पृथिव्याः क्षितिजो विशालश्चन्द्रस्य निकटतोऽपि तावान् लघुः कस्माद् दृश्यते ? एतेन ज्ञायते यद् चित्रग्राहकः पृथ्व्याः क्षितिजस्य निकटस्थ आसीदिति। अत्र चित्रे पृथिव्याः क्षितिजस्य पृष्ठभागे स्थित्वाऽस्तं गच्छन् उदयं वा व्रजन् चन्द्रो लक्ष्यते। अतश्चन्द्रस्य कस्यामपि भ्रमणकक्षायां स्थित्वा चित्रमिदं गृहीतं स्यादेवं कथमपि न ज्ञायते न च माननेऽप्यायाति। तदा कथमेतत् सम्भावितम् ?

केवलं चन्द्रस्य यथाकथमपि प्रदक्षिणाभिरीदृशं चित्रं कथमप्यागन्तुं न शक्नोति। अत इदं चित्रं काल्पनिकं विद्यते तदिति निश्चितं भवति।"

## उपसंहारः

एवं कथयितुं शक्यते यदधुनाऽवधि चन्द्रस्योत्पत्तिः, तस्यास्तित्वं, तस्य निर्माणं, पृथ्व्या सह तदीयः सम्बन्धः, सूर्यमालाया वयः, चन्द्रस्याकार-प्रकारौ, घनतोयात्मकं चन्द्रमण्डलं, तस्य शशलाञ्छनम्, चन्द्रदीप्तिः चन्द्रस्य कारणात् पार्थिवसमुद्राणां ह्रासा वृद्धयश्च, चन्द्रकान्तमणिः, चन्द्ररथः, चन्द्राश्वश्चेत्यादि बहूनि तथ्यानि निश्चयरहितानि सन्ति। तथा स्वयं वैज्ञानिका अपि विषयेष्वेतेषु नैकमत्यं धारयन्ति, तदा वयं कथं मानयेम ? यदस्माकं शास्त्राणि केवलं कपोलकल्पनाजल्पितानि सन्ति,

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

येषु चन्द्रस्य तदधरातलस्य च यादशं वर्णनं मिलति, तस्य देवतात्वं च सर्वत्र घोषितं विद्यते, तत्सर्वं मिथ्यैवास्तीति ?

अस्माकमियं दृढा धारणाऽस्ति यच्चन्द्रमसि व्योमयानानां व्योमयात्रिणाञ्च गमनमवतरणं च तथ्यरहितमेवास्ति.

यावत् सत्यस्योद्‌घाटनं न भवेत्तावदस्मिन् विषये गवेषणाकार्या किञ्च सत्यान्न प्रमदितव्यमिति ।

---

तत्त्वज्ञानमुद्रालेखः

जिज्ञासा + विनयः

= सत्तत्त्वप्राप्तिः

जिज्ञासा + स्वच्छन्दता

= मिथ्याभिनिवेशः

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

# अस्माकमुद्देश्यं कर्त्तव्यनिर्देशश्च



लेखकः
डॉ॰ रुद्रदेवः त्रिपाठी
साहित्याचार्यः
M. A. Ph. D.

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

## 卐 निबंधगत—विषयाः 卐

| | पत्रं |
|---|---|
| * वर्तमानवैज्ञानिकानां मानसदर्शनम् | १०७ |
| * विकासवादस्य विचारः | १०७ |
| * पुरातन–भारते विज्ञानशोध–प्रवृत्तिः | १०९ |
| * भू–भ्रमण–शोध–संस्थान—प्रस्थापनोद्देश्यम् | |
| * संस्थान–प्रवृत्तिः | ११० |
| * विज्ञानवादप्रचारित—सत्याभासान् प्रति कर्त्तव्यतानिर्देशः | १११ |

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

## वर्त्तमानवैज्ञानिकानां मानसदर्शनम्

"वर्त्तमानं भूतं भविष्यच्च विचिन्त्य पुरो वर्धते ।" अतीतस्यालोके भविष्यतश्चिन्तनं विदधतां वार्त्तमानिकानां विचारा वैविध्यपूर्णा विद्यन्ते ।

तत्रापि वैज्ञानिकानां चिन्तनेन सहैव वर्धमाना परीक्षण–प्रणाली घटाटोप–घटिता प्रयोगशाला–प्रचारप्रसार–परिपोषिता नैकक्षेत्रेषु लब्धसाफल्या च विज्ञान–विजृम्भणा प्रतिप्राणि समाकर्षयन्ती राजते ।

लक्ष–लक्षशो मुद्राणां व्ययेन सम्प्राप्तानां केषाञ्चित् साफल्यानां बलेन बलीयांसो वैज्ञानिका अथाऽऽत्मनो दिग्विजयितां प्रख्यापयन्तोऽपि दृश्यन्ते ।

परं ! यदि साकल्येन लाभालाभ–बलाबल–हेयोपादेयबुद्धया विचार्यते चेत् ! तर्हि स्पष्टं प्रतीयते यत्–पूर्वेषामपि पूर्वैर्भारतीय–विद्वद्भिः सुपरीक्ष्य घोषिता गृहीतमुक्ता इव वैज्ञानिक्यो घोषणा एव भूयोभूयोऽभिनवरूपाणि धारयित्वा प्रत्यक्षमायान्ति ।

## विकासवादस्य विचारः

यथाऽय विकासवादो–यो हि विज्ञानस्यैकः प्रधानशाखा-भूतोऽस्ति स हि–भारतस्य कृते नावीन्यं न धारयति ! मनुष्यजन्मनो दुर्लभत्वं घोषयद्भिरस्माकं शास्त्रैर्बहोः कालात् पूर्वमेव चतुरशीतिलक्ष-योनीनामनन्तरं मानवस्य जन्म भवतीति प्रतिपादितम् । लोकमान्येन

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

बालगङ्गाधरतिलकमहाशयेन स्वकीये 'गीतारहस्ये' लिखितमस्ति यद्—

"चतुरशीतिलक्षसंख्यकयोनीनां भारतीया धारणा नास्ति निराधारा।"

विकासवादस्य सिद्धान्ते आधिभौतिकशास्त्रिभिरपीदं मानितं यत् "सृष्टेरारम्भे कस्माच्चिदेकस्माद् लघीयसः सूक्ष्मात् सजीवाद् जन्तोर्मनुष्यस्योत्पत्तिरभूदिति।"

एतेनेदं स्पष्टं भवति यत्—

"सूक्ष्मवर्त्तुलजन्तोः स्थूलवर्तुलजन्तुनिर्मितौ, स्थूलस्य जन्तोः पुनर्लघुकीटस्थितौ, लघीयसः कीटानन्तरं चाऽन्यप्राणिरूपधारणे च प्रत्येकं वंशजातेरनेकानि परम्परा–वर्षाणि व्यतीतानि समभवन्।

एकेनाङ्ग्लवैज्ञानिकेनारम्भादेव प्रमाणितं यद्—

"जले निवसतां तनु–तनुतराणां मत्स्यानां विकासक्रमे तथा तेषामेव मत्स्येभ्यो मनुष्यरूपे परिणतौ प्रायः ५३–५४ लक्षमितानां वंशाना परम्परा व्यतीता।"

किञ्च सम्भाव्यते यदियं संख्येतोऽपि दशगुणिता व्यतीता स्यात्। अथ चाऽस्यां संख्यायामेव लघुजलचराणां पूर्ववर्तिसूक्ष्मजन्तूनामपि समावेशः क्रियेत चेद्! मन्ये सेयं संख्या न जाने कियतीनां लक्षसंख्यकवंशपरम्पराणां कल्पनयाऽऽकुलिता स्यात्!"

एतेन ज्ञायते यत् पुराणेषु प्रसिद्धाया चतुरशीतिलक्षयोनीनां

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

धारणाया अपेक्षया वर्तमानविज्ञानवादिनां कल्पना अतीव स्थूला दृश्यते ।

भारतस्य दर्शनशास्त्रेषु साङ्ख्यशास्त्रस्य त्वाधारो विकासवाद एवास्ति । अनुभूततत्त्वेभ्योऽज्ञाततत्त्वानि प्रति तर्कप्रमाणगवेषणा-करणमस्य शास्त्रस्य वैशिष्ट्यम् ।

प्रसिद्धेन विज्ञानशास्त्रिणा हक्सलेमहोदयेनाऽस्य शास्त्रस्य महती प्रशंसा कृताऽस्ति कथितञ्च यद्–

"हिन्दूशास्त्रेषु विकासवादस्य तदा प्रामाणिकी प्रतिष्ठाऽभविष्यद् यदा डार्विनस्य पालमहोदयस्य च जन्मापि नाऽभविष्यत्" ।

## पुरातन-भारते विज्ञानशोधप्रवृत्तिः

कथनस्याऽस्याऽयमाशयोऽस्ति यद्–"भारतीयानां वैज्ञानिकी प्रवृत्तिर्बहोः कालात् पूर्वमेव प्रसृतिमत्यासीत्, परं ! हीरकं विहाय काचकणिकायै जीवनव्यत्यापनं नास्ति यथा बुद्धिमत् कर्म, तथैवाऽऽध्यात्मिकविद्याविदां भारतीयानां विज्ञानवादं प्रति नासीदाकर्षणम् ।"

अत एव भूयोभूयो विज्ञायाऽपि विज्ञानविद्यां हृद्यां विधायाऽपि लोकैषणां गौणीकृत्याध्यात्मसाधनायामेव दत्तचित्ता व्यराजन्तेति ।

साम्प्रतिके काले विज्ञाननाम्ना प्रचारितस्य विज्ञानवादस्य चाक-चक्येन भ्रान्तदृष्टयः केचन भारतीयाः शास्त्राणि सत्यानि न मन्यन्ते, न च तानि प्रति श्रद्दधते; इत्यहो खेदस्य विषयः !

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

## भू–भ्रमण–शोध–संस्थान–प्रस्थापनोद्देश्यम्

ईदृशीनां मिथ्यामोह–परम्पराणां तमसोऽपवारणाय भारतस्य नैके महात्मानः कृतसङ्कल्पाः सन्ति, तेषां च कर्तव्यमार्गा अपि भिन्नाः भिन्नाः ।

केऽपि शास्त्राणि पुरस्कृत्य परेषां विचारान् खण्डयन्ति, परे हेयं हेयमित्याघोष्य तर्जयन्ति, अपरे मौनमास्थाय परमेश्वरमेव प्रार्थयन्ते सद्बुद्धिददानाय ।

तेष्वेव, पूज्य–उपाध्यायश्रीधर्मसागरगणीविनेयाः गणिवराः श्रीमदभयसागरमहाराजाः 'विषस्य विषमौषधमिति न्यायेन विज्ञानवादिप्रस्थापितैस्तर्कैरेव तर्कान्तराणि संस्थाप्य चिन्तनाय प्रेरयन्ति ।

प्रायो विंशतिवर्षेभ्योऽनवरतं प्रयस्यद्भिरेतैर्महात्मभिर्ये ये तर्का उपस्थापितास्तान् श्रुत्वा पठित्वा च विज्ञानवादविमोहिता विद्वांसः सत्यमेव चिन्तासन्तानतान्ता नितान्तं भवन्ति ।

बहुभिर्विज्ञानविद्भिः सत्यस्याख्यातॄणां महात्मनामेतेषां विचाराः परीक्षापदवीमारोप्य समीक्षिताः ।

भारतस्य प्रसिद्धिं श्रिता विज्ञानविदस्तथा विदेशीया वैज्ञानिका अपि मानितवन्तो यदस्ति किमपि चिन्तितव्यमत्र यस्य पुनर्विचारोऽवश्यं करणीय इति ।

## संस्थान–प्रवृत्तिः

अहर्निशं सत्याराधनायैव जीवनं समर्पयन्तो भारतीया महात्मानो यद्यपि भौतिकीषु भावनासु समयं न यापयन्ति, न चेच्छन्ति लौकिकीं

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

कामपि नश्वरीं ख्यातिम्, परं श्रद्धाराधितगुरुचरणा लोकस्य सत्य-मार्गाद् वलनं शास्त्रश्रद्धातः पराचलनं न विचारसहमिति मत्वा भारतीय-संस्कृतेः प्रतिष्ठानायेदंशि कर्माण्याचरन्ति ।

श्रीमदभयसागरैःमहात्मभिरपि भौगोलिक–विज्ञानस्याऽस्य स्वदेशि–विदेशिसाहित्य–गहनाध्ययनद्वारा रहस्यं विज्ञाय यथाकालं स्वप्रवचनेषु सत्योद्बोधनं प्रदत्तम् ।

जिज्ञासूनामनुरोधादेव सरल–साहित्यनिर्माणं कृतम्; मानचित्रा-दिभिश्च बोधसारल्यमानीतम् ।

ग्रामं ग्रामं भ्रामं भ्रामं धर्मचर्य्यासु धर्मचर्चासु च जनान् प्रबोध्य विज्ञाननाम्ना प्रचारितस्य विज्ञानवादस्य स्वारस्यं तदन्तर्निहितं कूट–कपटञ्चोद्घाटय—'यावत् कस्यापि तथ्यस्य शोधनमपूर्णं विद्यते नतमां तावत् स्वस्य सत्यपथाद् विचलितव्य' मिति सद्बोध्यात्म-संस्कृत्यामेव स्थिरतासनाथं श्रद्धातव्यमिति प्रेरितम् ।

**विज्ञानवादप्रचारितान् सत्याभासान्**
**प्रति कर्त्तव्यतानिर्देशः**

"भवतु नाम पृथ्वी स्थिरा चलिता वा,
गोलाकारा तदतिरिक्ताकारा वा;
अस्त्वचलः सूर्यश्चलो वा,
गच्छन्तु चन्द्रतले

"तिष्ठन्तु वाऽन्यस्मिन् कस्मिन्नपि भुवस्तल–स्थले;
विवदन्तां परस्परं वैज्ञानिकाः
पृथ्वी–चन्द्रग्रहादीनां स्थिति–गत्यु–त्परयादिविषयेषु ।"

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

का तत्र परिदेवना ?

'मुण्डे मुण्डे मतिर्भिन्ना' त्वस्त्येव ।

कल्पनालोकस्य कदर्थनासु विचरतां हस्ते घटकुटीन्यायेन भूयोऽपि महर्षीणां सिद्धान्ता एव शरणा भविष्यन्ति, इति निश्चितमेव । किन्तु गड्डलिकाप्रवाहमश्रित्य सत्याच्च प्रमदितव्यमिति च विस्मृत्य जना मानव–जन्मनो नैरर्थक्यं नापादयेरन्निति धिया वयं कामयेमहि यत्—

"सन्तः परीक्ष्यान्तरद् भजन्ते मूढः परप्रत्ययनेयबुद्धि"-रिति विमृश्य—

स्वसंस्कृतिं मा त्यजत !

स्वशास्त्राणि मा निन्दत !

स्वाचार्यान् माऽवमानयत !

सत्यं च पन्थानं मा मुञ्चतेति ।

उद्देश्यमिदमेवास्माकं प्रेरकम् ।

भू–भ्रमण–शोधसंस्थानस्य स्थापनापूर्वकं विविध–लघुबृहत् पुस्तिकानां प्रकाशनेषु यथावसरं प्रदर्शिनीनां प्रायोगिकपरीक्षाणानां विचारगोष्ठीनाञ्च समायोजनास्वपि निदानमिदमेव विज्ञानवादकषपरीक्षणगर्भम् ।

अत्र विषयेऽस्माकमिदं साग्रहं निवेदनं यत् प्रकाशितस्यास्मत्साहित्यस्य समालोचनापूर्वकं सत्याऽसत्यविमर्शाः करणीयाः, सति सम्भवे च वयमपि सूचनीयाः ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

सत्यं किं ? इति विमृश्यैव पदात् पदान्तरं यातव्यमिति मनसि दृढं निश्चेतव्यम् ।

प्रबुद्धैरबुद्धा अवबोद्धव्याः ।

सुविचार्य मतान्तरं स्वीकर्तव्यं,

हठादारोपाद् वागाडम्बराद् वा शिथिलैर्न भाव्यम् ।

मुखमस्तीति वक्तव्यं दशहस्ता हरीतकीति प्रचारका प्रचारयन्तु नाम ! परं सहसा तदुरीकरणायाऽऽतुरता न दर्शनीया ।

किञ्च—

सत्ये रतिस्तत्र मतिः स्थिरा स्यात्,
विचार्य कार्यं किमपीह कुर्याम् ।
आर्या च मे संस्कृतिरस्ति वर्या,
नाहं चलः स्यां परिशुद्धमार्गात् ॥'

इति निश्चित्य स्व–परकल्याणाय यतितव्यमिति संक्षिप्यास्ति कर्तव्यनिर्देशोऽस्माकं परिस्थितिबलापतित इति ।

समीक्षणीयं........धीधनः ! ! !

तत्त्वज्ञानप्रतिष्ठा युक्ति–हेतूदाहरणबलेना-पाद्यमाना नहि समनस्कानां तोष हेतुः,

अतीन्द्रियपदार्थव्याख्या पटुतत्त्वज्ञाननिष्ठा-सद्गुरुपासनाधिगम्यदृष्टिवैशद्याधीना अन्तरङ्गशुद्धि-बलापाद्येति तत्त्वम् ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

तत्त्वज्ञानप्रतिष्ठानोपयोगिन एतत्पुस्तकस्य-

प....का....श....ने

अर्थसहयोगदातृणां पुण्यमतां

ना....मा....व....ली

१००१) जेशिंगभाई, कालीदास ट्रस्ट

ह० सेठ मनुभाई जेशिंगभाई

अमदावाद-६

५०१) श्री सीमंधरस्वामिजिन मंदिर ज्ञानखातुं

महेसाणा

पू० आ० श्री कैलाससागरसूरी-

श्वराणांसदुपदेशेन

५१) शेठ कांतिभाई पी. शाह मुंबई-६

५१) बाबूभाई एम. गांधी, मुंबई-२

अ....नु....मो....द....या....मः

एतेषां महाभागानां धर्मस्नेहपूर्णमेतं सहयोगमिति ॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

# सम्यक् पठत ! विचारयत !

- ध्रुवप्रदेशे मासषट्कस्याहोरात्रे कथम्?
- आस्ट्रेलिया–भारतयोर्मध्ये ऋतुभेदः कस्मात्?
- चन्द्रस्यापि स्वकीयः प्रकाशो विद्यते?
- समुद्रे वेला चन्द्रमस आकर्षणेन नाऽऽयाति!
- पृथिव्याः किं स्वरुपम्?
- विज्ञाननाम्ना प्रचारितेषु सिद्धान्तेषु सत्यमात्रा कियती?—

—इत्यादीनां विषयाणां प्रामाणिकरूपेण तटस्थदृष्ट्या संशोधनाय
संलग्नस्य भू–भ्रमण–शोध–संस्थानस्य साहित्यम्
तटस्थदृष्ट्या
समीक्षया जिज्ञासया योग्यनिश्रया च
पठत ! तत्त्वाववोधं कुरुत !!
सत्यं च तत्त्वं जानीत !!!

卐

साहित्यप्राप्ति सङ्केतौ :—

**श्री–भू–भ्रमण–शोध–साहित्य कार्यालयः**

कार्यवाहक :

दिनेशचन्द्र नगीनदास परीख
कापडबजार, मु. कपडवंज (जि. खेडा) गुजरात

卐

भू–भ्रमण–शोध–संस्थान
पो. बो. नं. ६ मु. महेसाणा (उ. गु.)

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

○ किमुत पृथ्वी गोलाकारा ?

○ किमुत पृथ्वी परिभ्रमति ?

○ किमुत एपोलोयानं चंद्रलोके अवतीर्णम् ?

यदि जिज्ञासथ तर्हि सम्प्रेक्षया पश्यताम् तटस्थरीत्या लिखितमषस्तनं साहित्यम्.

## हिंदी

१ प्रश्नावली
२ क्या पृथ्वीका आकार गोल है ?
३ भूगोल विज्ञान समीक्षा
४ सोचो और समझो ! ! !
५ पृथ्वी [illegible] निर्णय
६ क्या [illegible] ?
७ कौन [illegible] (भा. १)
८ [illegible]
९ [illegible] समस्या !
१० [illegible]
११ [illegible] चांद पर पहुँचा ?

## संस्कृत

१ भूगोल भ्रमभंजनी (श्लोकबद्ध)
गुजराती भावार्थ साथे
२ विज्ञानवादविमर्शः

## ગુજરાતી

૧ પ્રશ્નાવલી
૨ શું એ ખરૂં હશે ?
૩ પૃથ્વીનો આકાર નિર્ણય
૪ પૃથ્વી ખરેખર ગોળ નથી !
૫ શું પૃથ્વી ખરેખર ફરે છે ?
૬ કોણ શું કહે છે ? (ભાગ ૧)
૭ સત્ય શું ?
૮ એપોલો ક્યાં ઉતર્યું ?
૯ એપોલોની ચંદ્ર યાત્રાનું રહસ્ય
૧૦ આપણી પૃથ્વી
૧૧ મંગલ સંદેશ

## English

1 A Questionnaire
2 What Others Say
3 A review of The Earth-Shape
4 Dose The Earth Really Rotate ?

# ○ भू.-भ्रमण-शोध-संस्थान ○

पो. बो. नं. ६ · मु. महेसाणा [उ. गुजरात]

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust